More Books At

# रुचिरा

द्वितीय भागः

सप्तमवर्गाय संस्कृतपाठ्यपुस्तकम्



w.GOALias.blogspot.c

www.GOALias.blogspot.com

# पाठानुक्रमणिका


| | | |
|---|---|---|
| | *पुरोवाक्* | *v* |
| | *भूमिका* | *ix* |
| | *मङ्गलम्* | 1 |
| **प्रथमः पाठः** | सुभाषितानि | 3 |
| **द्वितीयः पाठः** | दुर्बुद्धिः विनश्यति | 7 |
| **तृतीयः पाठः** | स्वावलम्बनम् | 13 |
| **चतुर्थः पाठः** | हास्यबालकविसम्मेलनम् (*अव्ययप्रयोगः*) | 19 |
| **पञ्चमः पाठः** | पण्डिता रमाबाई | 26 |
| **षष्ठः पाठः** | सदाचारः | 31 |
| **सप्तमः पाठः** | सङ्कल्पः सिद्धिदायकः (*धातुप्रयोगः*) | 36 |
| **अष्टमः पाठः** | त्रिवर्णः ध्वजः | 44 |
| **नवमः पाठः** | विमानयानं रचयाम | 49 |
| **दशमः पाठः** | विश्वबन्धुत्वम् (*कारकविभक्तिः उपपदविभक्तिश्च*) | 53 |
| **एकादशः पाठः** | समवायो हि दुर्जयः | 59 |
| **द्वादशः पाठः** | कल्पलतेव विद्या | 64 |
| **त्रयोदशः पाठः** | अमृतं संस्कृतम् (*इकारान्तस्त्रीलिङ्गः*) | 69 |
| **चतुर्दशः पाठः** | अनारिकायाः जिज्ञासा (*ऋकारान्तपुँल्लिङ्गः*) | 75 |
| **पञ्चदशः पाठः** | लालनगीतम् | 80 |
| **परिशिष्टम्** | वर्णविचारः, कारकम्, शब्दरूपाणि धातुरूपाणि च | 85 |

www.GOALias.blogspot.com

# मङ्गलम्

*विश्वानि देव सवितर्दुरितानि परा सुव।*
*यद् भद्रं तन्न आ सुव ॥ 1 ॥*

–ऋग्वेदः (5.82.5)

*परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।*
*सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥ 2 ॥*

–विक्रमोर्वशीयम् (5.24)

## भावार्थः

हे सूर्य देव! हमारे समस्त पापों को दूर करें तथा जो हमारे लिए मङ्गलकारक है उसे हमें प्रदान करें ॥ 1 ॥

एक दूसरे के विरोध में रहने वाली लक्ष्मी और सरस्वती का एक आश्रय में दुर्लभ समागम सदा सज्जनों के कल्याण के लिए हो ॥ 2 ॥



www.GOALias.blogspot.com

## प्रथमः पाठः



# सुभाषितानि

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ 6 ॥

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **पृथिव्याम्** | – | धरती पर |
| **सुभाषितम्** | – | सुन्दर वचन |
| **मूढैः** | – | मूर्खों के द्वारा |
| **पाषाणखण्डेषु** | – | पत्थर के टुकड़ों में |
| **रत्नसंज्ञा** | – | रत्न का नाम |
| **विधीयते** | – | किया जाता है |
| **धार्यते** | – | धारण किया जाता है |
| **तपते** | – | जलता है |
| **वाति** | – | बहता है / बहती है |
| **वायुश्च** (वायुः + च) | – | पवन भी |
| **प्रतिष्ठितम्** | – | स्थित है |
| **तपसि** | – | तपस्या में |
| **शौर्ये** | – | बल में |
| **नये** | – | नीति में |
| **विस्मयः** | – | आश्चर्य |
| **बहुरत्ना** | – | अनेक रत्नों वाली |
| **वसुन्धरा** | – | पृथिवी |
| **सद्भिरेव** (सद्भिः + एव) | – | सज्जनों के साथ ही |
| **सहासीत** (सह + आसीत) | – | साथ बैठना चाहिए |
| **कुर्वीत** | – | करना चाहिए |
| **सद्भिर्विवादम्** (सद्भिः + विवादम्) | – | सज्जनों के साथ झगड़ा |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **नासद्भिः** (न+ असद्भिः) | – | असज्जन लोगों के साथ नहीं |
| **धनधान्यप्रयोगेषु** | – | धनधान्य के प्रयोग में/व्यवहार में |
| **संग्रहेषु** | – | संग्रहों में, संचय (इकट्ठा) करने में |
| **त्यक्तलज्जः** | – | संकोच या भीरूता को छोड़नेवाला |
| **क्षमावशीकृतिर्लोके** (क्षमावशीकृतिः + लोके) | – | संसार में क्षमा (सबसे बड़ा) वशीकरण है |
| **शान्तिखड्गः** | – | शान्ति की तलवार |

## अभ्यासः



**1. सर्वान् श्लोकान् सस्वरं गायत।**

**2. यथायोग्यं श्लोकांशान् मेलयत–**

| क | ख |
|---|---|
| धनधान्यप्रयोगेषु | नासद्भिः किञ्चिदाचरेत्। |
| विस्मयो न हि कर्त्तव्यः | त्यक्तलज्जः सुखी भवेत्। |
| सत्येन धार्यते पृथ्वी | बहुरत्ना वसुन्धरा। |
| सद्भिर्विवादं मैत्रीं च | विद्यायाः संग्रहेषु च। |
| आहारे व्यवहारे च | सत्येन तपते रविः। |

**3. एकपदेन उत्तरत–**

(क) पृथिव्यां कति रत्नानि?

(ख) मूढैः कुत्र रत्नसंज्ञा विधीयते?

(ग) पृथिवी केन धार्यते?

(घ) कैः सङ्गतिं कुर्वीत?

(ङ) लोके वशीकृतिः का?

www.GOALias.blogspot.com



4. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–

(क) सत्येन वाति वायुः।

(ख) सद्भिः एव सहासीत।

(ग) वसुन्धरा बहुरत्ना भवति।

(घ) विद्यायाः संग्रहेषु त्यक्तलज्जः सुखी भवेत्।

(ङ) सद्भिः मैत्रीं कुर्वीत।

5. प्रश्नानामुत्तराणि लिखत–

(क) कुत्र विस्मयः न कर्त्तव्यः?

(ख) पृथिव्यां त्रीणि रत्नानि कानि?

(ग) त्यक्तलज्जः कुत्र सुखी भवेत्?

6. मञ्जूषातः पदानि चित्वा लिङ्गानुसारं लिखत–

रत्नानि वसुन्धरा सत्येन सुखी अन्नम् वह्निः रविः पृथ्वी सङ्गतिम्

| पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

7. अधोलिखितपदेषु धातवः के सन्ति?

| पदम् | धातुः |
|---|---|
| कर्त्तव्यः | .................... |
| पश्य | .................... |
| भवेत् | .................... |
| स्थितः | .................... |

www.GOALias.blogspot.com

द्वितीयः पाठः

# दुर्बुद्धिः विनश्यति

अस्ति मगधदेशे फुल्लोत्पलनाम सरः। तत्र संकटविकटनामकौ हंसौ निवसतः। कम्बुग्रीवनामा तयोः मित्रम् एकः कूर्मः अपि तत्रैव प्रतिवसति स्म।

अथ एकदा धीवराः तत्र आगच्छन् अकथयन् च-वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः। एतत् श्रुत्वा कूर्मः अवदत्-"मित्रे! किं युवाभ्यां धीवराणां वार्ता श्रुता? अधुना किम् अहं करोमि?" हंसौ अवदताम्- "प्रातः यद् उचितं तत्कर्त्तव्यम्।" कूर्मः अवदत्- "मैवम्। तद् यथाऽहम् अन्यं ह्रदं गच्छामि तथा कुरुतम्।"



हंसौ अवदताम्-"आवां किं करवाव?" कूर्मः अवदत्-"अहं भवद्भ्यां सह आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि।"

हंसौ अवदताम्-"अत्र कः उपायः?" कच्छपः वदति-"युवां काष्ठदण्डम् एकं चञ्च्वा धारयताम्। अहं काष्ठदण्डमध्ये अवलम्ब्य युवाभ्यां पक्षबलेन सुखेन गमिष्यामि।" हंसौ अकथयताम्- "सम्भवति एषः उपायः। किन्तु अत्र एकः अपायोऽपि वर्तते। आवाभ्यां नीयमानं त्वामवलोक्य जनाः किञ्चिद् वदिष्यन्ति एव। यदि त्वमुत्तरं दास्यसि तदा तव मरणं निश्चितम्। अतः त्वम् अत्रैव वस।" तत् श्रुत्वा क्रुद्धः

www.GOALias.blogspot.com



कूर्मः अवदत्-''किमहं मूर्खः? उत्तरं न दास्यामि। किञ्चिदपि न वदिष्यामि।'' अतः अहं यथा उक्तवान् तथा युवां कुरुतम्।



एवं कृते काष्ठदण्डे लम्बमानं कूर्मं दृष्ट्वा गोपालकाः पश्चाद् अधावन् अवदन् च- ''हंहो! महदाश्चर्यम्। हंसाभ्यां सह कूर्मोऽपि उड्डीयते।'' कश्चिद् वदति- ''यद्ययं कूर्मः कथमपि निपतति तदा अत्रैव पक्त्वा खादिष्यामि।'' अपरः अवदत्- ''सरस्तीरे दग्ध्वा खादिष्यामि''। अन्यः अकथयत्- ''गृहं नीत्वा भक्षयिष्यामि'' इति।

तेषां तद् वचनं श्रुत्वा कूर्मः मित्रयोः दत्तं वचनं विस्मृत्य कोपेन अवदत्-''यूयं भस्म खादत'' इति वदन्नेव कूर्मः आकाशात् पतितः गोपालकैः मारितश्च। अतएवोक्तम्-

सुहृदां हितकामानां वाक्यं यो नाभिनन्दति।
स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति॥

## शब्दार्थाः

| | | |
|---|---|---|
| सरः | - | तालाब |
| कूर्मः/कच्छपः | - | कछुआ |
| प्रतिवसति स्म | - | रहता था |
| धीवराः | - | मछुआरे |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **मत्स्यकूर्मादीन्** | – | मछली, कछुआ आदि को |
| **मारयिष्यामः** | – | मारेंगे |
| **मैवम्** (मा + एवम्) | – | ऐसा नहीं |
| **ह्रदम्** | – | तालाब को |
| **धारयताम्** | – | धारण करें |
| **पक्षबलेन** | – | पंखो के बल से |
| **अपायः** | – | हानि |
| **नीयमानम्** | – | ले जाते हुए |
| **अवलोक्य** | – | देखकर |
| **लम्बमानम्** | – | लटकते हुए (को) |
| **उड्डीयते** | – | उड़ रहा है |
| **विस्मृत्य** | – | भूल कर |
| **भस्म** | – | राख |
| **सुहृदाम्** | – | मित्रों का/के/की |
| **हितकामनाम्** | – | कल्याण की इच्छा रखने वाले का/के/की |
| **अभिनन्दति** | – | प्रसन्नतापूर्वक स्वीकार करता/करती है |
| **दुर्बुद्धिः** | – | दुष्ट बुद्धि वाला |

## अभ्यासः



**1. उच्चारणं कुरुत–**

| | | |
|---|---|---|
| फुल्लोत्पलम् | अवलम्ब्य | पक्त्वा |
| कम्बुग्रीवः | आवाभ्याम् | भक्षयिष्यामि |
| उक्तवान् | ह्रदम् | सुहृदाम् |
| भवद्भ्याम् | उड्डीयते | भ्रष्टः |

www.GOALias.blogspot.com



**2. एकपदेन उत्तरत-**

(क) कूर्मस्य किं नाम आसीत्?

(ख) सरस्तीरे के आगच्छन्?

(ग) कूर्मः केन मार्गेण अन्यत्र गन्तुम् इच्छति?

(घ) लम्बमानं कूर्मं दृष्ट्वा के अधावन्?

**3. अधोलिखितवाक्यानि कः कं प्रति कथयति इति लिखत-**

| | कः कथयति | कं प्रति कथयति |
|---|---|---|
| यथा- प्रातः यद् उचितं तत्कर्त्तव्यम्। | **हंसौ** | **कूर्मं प्रति** |
| (क) अहं भवद्भ्यां सह आकाशमार्गेण गन्तुम् इच्छामि। | .................... | .................... |
| (ख) अत्र कः उपायः? | .................... | .................... |
| (ग) अहम् उत्तरं न दास्यामि। | .................... | .................... |
| (घ) यूयं भस्म खादत। | .................... | .................... |

**4. मञ्जूषातः क्रियापदं चित्वा वाक्यानि पूरयत-**

अभिनन्दति भक्षयिष्यामः इच्छामि वदिष्यामि उड्डीयते प्रतिवसति स्म

(क) हंसाभ्यां सह कूर्मोऽपि ....................।

(ख) अहं किञ्चिदपि न ....................।

(ग) यः हितकामनां सुहृदां वाक्यं न ....................।

(घ) एकः कूर्मः अपि तत्रैव ....................।

(ङ) अहम् आकाशमार्गेण अन्यत्र गन्तुम् ....................।

(च) वयं गृहं नीत्वा कूर्मं ....................।

www.GOALias.blogspot.com



**5. पूर्णवाक्येन उत्तरत–**

(क) कच्छपः कुत्र गन्तुम् इच्छति?

(ख) कच्छपः कम् उपायं वदति?

(ग) लम्बमानं कूर्मं दृष्ट्वा गोपालकाः किम् अवदन्?

(घ) कूर्मः मित्रयोः वचनं विस्मृत्य किम् अवदत्?

**6. घटनाक्रमानुसारं वाक्यानि लिखत–**

(क) कूर्मः हंसयोः सहायतया आकाशमार्गेण अगच्छत्।

(ख) गोपालकाः अकथयन्–वयं पतितं कूर्मं खादिष्यामः।

(ग) कूर्मः हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

(घ) केचित् धीवराः सरस्तीरे आगच्छन्।

(ङ) कूर्मः अन्यत्र गन्तुम् इच्छति स्म।

(च) लम्बमानं कूर्मं दृष्ट्वा गोपालकाः अधावन्।

(छ) कूर्मः आकाशात् पतितः गोपालकैः मारितश्च।

(ज) 'वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः' इति धीवराः अकथयन्।

**7. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत–**

| | | | | |
|---|---|---|---|---|
| जलाशयम् | अचिन्तयत् | वृद्धः | दुःखिताः | कोटरे |
| वृक्षस्य | सर्पः | आदाय | समीपे | |

एकस्य वृक्षस्य शाखासु अनेके काकाः वसन्ति स्म। तस्य वृक्षस्य .................. एकः सर्पः अपि अवसत्। काकानाम् अनुपस्थितौ .................. काकानां शिशून् खादति स्म। काकाः .................. आसन्। तेषु एकः .................. काकः उपायम् ..................।

www.GOALias.blogspot.com



वृक्षस्य .................. जलाशयः आसीत्। तत्र एका राजकुमारी स्नातुं .................. आगच्छति। शिलायां स्थितं तस्याः आभरणम् .................. एकः काकः वृक्षस्य उपरि अस्थापयत्। राजसेवकाः काकम् अनुसृत्य .................. समीपम् अगच्छन्। तत्र ते तं सर्पं च अमारयन्। अतः एवोक्तम्–उपायेन सर्वं सिद्धयति।



**ध्यातव्यम्–**

- **इयं कथा 'पञ्चतन्त्रम्' इति ग्रन्थात् उद्धृता। पञ्चतन्त्रस्य लेखकः विष्णुशर्मा। पञ्चानां तन्त्राणां समाहारः पञ्चतन्त्रम् इति। अतः पञ्चतन्त्रस्य पञ्च भागाः सन्ति–मित्रभेदः, मित्रलाभः, सन्धिविग्रहः, लब्धप्रणाशः अपरीक्षित–कारकञ्च।**
- **अस्मिन् पाठे अनवसरे भाषणेन कथं सर्वनाशः भवतीति दर्शितम्। क्वचित् मौनं कार्यसाधकं भवति। यथोक्तम्–**

**विभूषणं मौनमपण्डितानाम्।**

**मूर्खो हि शोभते तावत् यावत् किञ्चिन्न भाषते।**

www.GOALias.blogspot.com

# तृतीयः पाठः

# स्वावलम्बनम्

*संख्यावाचिशब्दाः तद्-एतद्-शब्दौ च*

कृष्णमूर्तिः श्रीकण्ठश्च मित्रे आस्ताम्। श्रीकण्ठस्य पिता समृद्धः आसीत्। अतः तस्य भवने सर्वविधानि सुख-साधनानि आसन्। तस्मिन् विशाले भवने चत्वारिंशत् स्तम्भाः आसन्। तत्र अष्टादश-प्रकोष्ठेषु पञ्चाशत् गवाक्षाः, चतुश्चत्वारिंशत् द्वाराणि च आसन्। परं कृष्णमूर्तेः माता पिता च कृषकदम्पती। तस्य वासगृहं आडम्बरविहीनं सुन्दरञ्च आसीत्।





एकदा श्रीकण्ठः तेन सह तस्य गृहम् अगच्छत्। तत्र कृष्णमूर्तिः तस्य माता पिता च स्वशक्त्या श्रीकण्ठस्य आतिथ्यम् अकुर्वन्। तस्य गृहे कोऽपि कर्मकरः नासीत्। एतत् दृष्ट्वा श्रीकण्ठः अकथयत्- ''मित्र! अहं भवताम् आतिथ्येन सन्तुष्टोऽस्मि। केवलम् एतदेव तथ्यं मां दुःखयति यत् तव गृहे एकोऽपि भृत्यः नास्ति येन मम आतिथ्याय भवन्तः कष्टं कुर्वन्ति। मम गृहे तु बहवः कर्मकराः सन्ति।'' तदा स्वावलम्बी कृष्णमूर्तिः अवदत्-''मित्र! ममापि अष्टौ कर्मकराः सन्ति। ते च द्वौ पादौ, द्वौ हस्तौ, द्वे

www.GOALias.blogspot.com



नेत्रे, द्वे श्रोत्रे इति। एते प्रतिक्षणं ममाधीनाः। परन्तु तव भृत्याः अहर्निशं कर्माणि कर्तुं न शक्नुवन्ति। त्वं तु स्वकार्यार्थं स्वभृत्याधीनः। यदा यदा ते अनुपस्थिताः, तदा तदा त्वं कष्टम् अनुभवसि। स्वावलम्बने तु सर्वदा सुखमेव, न कदापि कष्टं भवति।''

अहं मासे मासे ऋतौ ऋतौ च स्व-दिनचर्याम् अनुकूलयामि। एतत् श्रुत्वा श्रीकण्ठः अकथयत्-''मित्र! अहं तु न जानामि के मासाः भवन्ति के च ऋतवः।'' एतत् श्रुत्वा कृष्णमूर्तिः द्वादशमासानां षण्णाम् ऋतूनां च नामानि अवदत्। श्रीकण्ठः अपृच्छत्-''एकस्मिन् मासे कति दिनानि भवन्ति''। कृष्णमूर्तिः अवदत्-''एकस्मिन् मासे त्रिंशत् एकत्रिंशत् वा दिनानि भवन्ति। फरवरी-मासे अष्टाविंशतिः दिनानि भवन्ति। परन्तु तत्र प्रत्येकं चतुर्थे वर्षे दिनानां संख्या एकोनविंशतिः भवति''। श्रीकण्ठः अवदत्-''मित्र! तव वचनानि श्रुत्वा मम मनसि महती प्रसन्नता जाता। अधुना अहमपि स्वकार्याणि स्वयमेव करिष्यामि।''

## शब्दार्थाः

| | | |
|---|---|---|
| **समृद्धः** | - | धनी |
| **चत्वारिंशत्** | - | चालीस |
| **अष्टादश** | - | अठारह |
| **प्रकोष्ठेषु** | - | कमरों में |
| **पञ्चाशत्** | - | पचास |
| **गवाक्षाः** | - | खिड़कियाँ |
| **चतुश्चत्वारिंशत्** | - | चवालीस |
| **कृषकदम्पती** | - | किसान पति-पत्नी |
| **आतिथ्यम्** | - | अतिथि-सत्कार |
| **कर्मकरः** | - | नौकर/सेवक |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **भवताम्** | – | आपके |
| **भृत्यः** | – | नौकर/सेवक |
| **अहर्निशम्** | – | रात–दिन |
| **त्रिंशत्** | – | तीस |
| **एकत्रिंशत्** | – | इकत्तीस |
| **अष्टाविंशतिः** | – | अट्ठाइस |

## अभ्यासः



**1. उच्चारणं कुरुत–**

| | | |
|---|---|---|
| विंशतिः | त्रिंशत् | चत्वारिंशत् |
| द्वाविंशतिः | द्वात्रिंशत् | द्विचत्वारिंशत् |
| चतुर्विंशतिः | त्रयस्त्रिंशत् | त्रयश्चत्वारिंशत् |
| पञ्चविंशतिः | चतुस्त्रिंशत् | चतुश्चत्वारिंशत् |
| अष्टाविंशतिः | अष्टात्रिंशत् | सप्तचत्वारिंशत् |
| नवविंशतिः | नवत्रिंशत् | पञ्चाशत् |

**2. अधोलिखितानां प्रश्नानामुत्तराणि लिखत–**

(क) कस्य भवने सर्वविधानि सुखसाधनानि आसन्?

(ख) कस्य गृहे कर्मकरः नासीत्?

(ग) श्रीकण्ठस्य आतिथ्यम् के अकुर्वन्?

(घ) प्रत्येकं चतुर्थवर्षे फरवरी–मासे कति दिनानि भवन्ति?

(ङ) कति ऋतवः भवन्ति?

(च) कृष्णमूर्तेः कति कर्मकराः सन्ति?

www.GOALias.blogspot.com



3. चित्राणि गणयित्वा तदग्रे संख्यावाचकशब्दं लिखत-



..................................



..................................



..................................



..................................



..................................



..................................

4. मञ्जूषातः अङ्कानां कृते पदानि चिनुत-

चत्वारिंशत् सप्तविंशतिः एकत्रिंशत् पञ्चाशत् अष्टाविंशतिः त्रिंशत् चतुर्विंशतिः

28 ...........................  27 ...........................

30 ...........................  31 ...........................

www.GOALias.blogspot.com



24 ........................... 40 ...........................

50 ...........................

5. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत–



| | | | | | |
|---|---|---|---|---|---|
| कृषकाः | कृषकौ | एते | धान्यम् | एषः | कृषकः |
| एतौ | क्षेत्रम् | कर्षति | कुरुतः | खननकार्यम् | रोपयन्ति |

..................................................................................................................

..................................................................................................................

..................................................................................................................

6. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत–

यथा– अहं स्वावलम्बनस्य सुखं प्रतिदिनम् अनुभवामि।
अहं **कस्य** सुखं प्रतिदिनम् अनुभवामि?

(क) कृष्णमूर्तिः सामान्यकृषकस्य पुत्रः आसीत्।

(ख) अधुना गृहे कोऽपि कर्मकरः नास्ति।

(ग) नक्षत्राणाम् आवागमनं स्वयमेव भवति।

(घ) एकस्मिन् वर्गे सप्तदश छात्राः अपठन्।

www.GOALias.blogspot.com



**7. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

| | | | | | |
|---|---|---|---|---|---|
| षड् | त्रिंशत् | एकत्रिंशत् | द्वौ | द्वादश | अष्टाविंशतिः |

(क) ................ ऋतवः भवन्ति।

(ख) मासाः ................ भवन्ति।

(ग) एकस्मिन् मासे ................ अथवा ................ दिवसाः भवन्ति।

(घ) फरवरी-मासे सामान्यतः ................ दिनानि भवन्ति।

(ङ) मम शरीरे ................ हस्तौ स्तः।



## ध्यातव्यम्-

**वैदिकपरम्परानुसारं भारतीयमासानां ऋतूनां च नामानि-**

| मासाः | ऋतुः | मासाः | ऋतुः |
|---|---|---|---|
| 1. चैत्रः<br>2. वैशाखः | 1. वसन्तः | 7. आश्विनः<br>8. कार्तिकः | 4. शरद् |
| 3. ज्येष्ठः<br>4. आषाढः | 2. ग्रीष्मः | 9. मार्गशीर्षः<br>10. पौषः | 5. हेमन्तः |
| 5. श्रावणः<br>6. भाद्रपदः | 3. वर्षा | 11. माघः<br>12. फाल्गुनः | 6. शिशिरः |

www.GOALias.blogspot.com

चतुर्थः पाठः

# हास्यबालकविसम्मेलनम्

अव्ययप्रयोगः

*(विविध-वेशभूषाधारिणः चत्वारः बालकवयः मञ्चस्य उपरि उपविष्टाः सन्ति। अधः श्रोतारः हास्यकविताश्रवणाय उत्सुकाः सन्ति कोलाहलं कुर्वन्ति च)*



**सञ्चालकः** – अलं कोलाहलेन। अद्य परं हर्षस्य अवसरः यत् अस्मिन् कविसम्मेलने काव्यहन्तारः कालयापकाश्च भारतस्य हास्यकविधुरन्धराः समागताः सन्ति। एहि, करतलध्वनिना वयम् एतेषां स्वागतं कुर्मः।

**गजाधरः** – सर्वेभ्योऽरसिकेभ्यो नमो नमः। प्रथमं तावद् अहम् आधुनिकं वैद्यम् उद्दिश्य स्वकीयं काव्यं श्रावयामि–

www.GOALias.blogspot.com



वैद्यराज! नमस्तुभ्यं यमराजसहोदर।
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च ॥
*(सर्वे उच्चैः हसन्ति)*

**कालान्तकः** - अरे! वैद्यस्तु सर्वत्र परन्तु न ते मादृशाः कुशलाः जनसंख्यानिवारणे। ममापि काव्यम् इदं शृण्वन्तु भवन्तः-

चितां प्रज्ज्वलितां दृष्ट्वा वैद्यो विस्मयमागतः।
नाहं गतो न मे भ्राता कस्येदं हस्तलाघवम् ॥
*(सर्वे पुनः हसन्ति)*

**तुन्दिलः** - *(तुन्दस्य उपरि हस्तम् आवर्तयन्)* तुन्दिलोऽहं भोः। ममापि इदं काव्यं श्रूयताम्, जीवने धार्यतां च-

परान्नं प्राप्य दुर्बुद्धे! मा शरीरे दयां कुरु।
परान्नं दुर्लभं लोके शरीराणि पुनः पुनः ॥
*(सर्वे पुनः अट्टहासं कुर्वन्ति)*

**धुन्धः** - अरे! भवन्तः जानन्ति एव यद् आधुनिकाः वैज्ञानिकाः प्लूटो-ग्रहं न स्वीकुर्वन्ति। तेषां मते अष्ट एव ग्रहाः, किन्तु मन्मतेन दश ग्रहाः सन्ति।

**श्रोतारः** - अयि! कविधुरन्धर! कस्तावत् दशमो ग्रहः? अस्माभिः कदापि न श्रुतम्। तस्य च कः प्रभावः?

**धुन्धः** - सावधानमनसा शृण्वन्तु भवन्तः दशमग्रहस्य वैशिष्ट्यम्–

सदा वक्रः सदा क्रूरः सदा मानधनापहः।
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः ॥

*(काव्यपाठश्रवणेन उत्प्रेरितः एकः बालकोऽपि आशुकवितां रचयति सहासं श्रावयति च)*

www.GOALias.blogspot.com



**बालकः** – श्रूयताम्, श्रूयतां भोः! ममापि काव्यम्–

गजाधरं यमं नौमि तुन्दिलं चान्नलोलुपम्।
दशमं च ग्रहं धुन्धं कालान्तकं तथैव च॥

*(काव्यं श्रावयित्वा 'हा हा हा' इति कृत्वा हसति। अन्ये चाऽपि हसन्ति। बहिः निष्क्रम्य सर्वे गृहं च गच्छन्ति।)*

## शब्दार्थाः

| | | |
|---|---|---|
| **अधः** | – | नीचे |
| **कोलाहलम्** | – | शोर |
| **काव्यहन्तारः** | – | काव्य को नष्ट करने वाले |
| **कालयापकाः** | – | समय बर्बाद करने वाले |
| **धुरन्धराः** | – | अग्रणी, श्रेष्ठ |
| **एहि** | – | आयें, आइए |
| **करतलध्वनिना** | – | तालियों से |
| **अरसिकेभ्यः** | – | नीरस जनों को |
| **स्वकीयम्** | – | अपने |
| **मादृशाः** | – | मेरे जैसे |
| **हस्तलाघवम्** | – | हाथ की सफाई |
| **तुन्दस्य** | – | तोंद के |
| **आवर्तयन्** | – | फेरता हुआ |
| **धार्यताम्** | – | धारण करें |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **परान्नम्** | – | दूसरों के अन्न को |
| **मन्मतेन** (मम + मतेन) | – | मेरे मत से |
| **वक्रः** | – | टेढ़ा |
| **क्रूरः** | – | निर्दयी, निष्ठुर |
| **मानधनापहः** | – | सम्मान और धन का अपहरण करनेवाला |
| **जामाता** | – | जमाई, दामाद |
| **उत्प्रेरितः** | – | प्रेरणा से |
| **आशुकविताम्** | – | तात्कालिक कविता को |
| **सहासम्** | – | हँसी के साथ |
| **नौमि** | – | प्रणाम करता हूँ |
| **अन्नलोलुपम्** | – | अनाज का लोभी |
| **निष्क्रम्य** | – | निकल कर |

## अभ्यासः



1. उच्चारणं कुरुत–

| | | |
|---|---|---|
| उपरि | अधः | उच्चैः |
| नीचैः | बहिः | अलम् |
| कदापि | अन्तः | पुनः |
| कुत्र | कदा | एकदा |

www.GOALias.blogspot.com



## 2. मञ्जूषातः अव्ययपदानि चित्वा वाक्यानि पूरयत-

| | | | | |
|---|---|---|---|---|
| अलम् | अन्तः | बहिः | अधः | उपरि |

(क) वृक्षस्य ................ खगाः वसन्ति।

(ख) ................ विवादेन।

(ग) वर्षाकाले गृहात् ................ मा गच्छ।

(घ) मञ्चस्य ................ श्रोतारः उपविष्टाः सन्ति।

(ङ) छात्राः चलच्चित्रगृहस्य ................ प्रविशन्ति।

## 3. अशुद्धं पदं चिनुत-

(क) गमन्ति, यच्छन्ति, पृच्छन्ति, धावन्ति। ......................

(ख) रामेण, गृहेण, सर्पेण, गजेण। ......................

(ग) लतया, सुप्रिया, रमया, निशया। ......................

(घ) लते, रमे, माते, प्रिये। ......................

(ङ) लिखति, गर्जति, फलति, सेवति। ......................

## 4. मञ्जूषातः समानार्थकपदानि चित्वा लिखत-

| | | | | |
|---|---|---|---|---|
| प्रसन्नतायाः | चिकित्सकम् | लब्ध्वा | कुटिलः | दक्षाः |

प्राप्य ................

कुशलाः ................

हर्षस्य ................

वक्रः ................

वैद्यम् ................

www.GOALias.blogspot.com



(क) मञ्चे कति बालकवयः उपविष्टाः सन्ति?

(ख) के कोलाहलं कुर्वन्ति?

(ग) गजाधरः कम् उद्दिश्य काव्यं प्रस्तौति?

(घ) तुन्दिलः कस्य उपरि हस्तम् आवर्त्तयति?

(ङ) लोके पुनः पुनः कानि भवन्ति?

(च) दशमः ग्रहः कः?

| | | | | | |
|---|---|---|---|---|---|
| नासिकायामेव | वारंवारम् | खड्गेन | दूरम् | मित्रता | मक्षिका |
| व्यजनेन | उपाविशत् | छिन्ना | सुप्तः | प्रियः | |

पुरा एकस्य नृपस्य एकः ............. वानरः आसीत्। एकदा नृपः ............. आसीत्। वानरः ............. तम् अवीजयत्। तदैव एका ............. नृपस्य नासिकायाम् ............. । यद्यपि वानरः ............. व्यजनेन तां निवारयति स्म तथापि सा पुनः पुनः नृपस्य ............. उपविशति स्म। अन्ते सः मक्षिकां हन्तुं ............. प्रहारम् अकरोत्। मक्षिका तु उड्डीय ............. गता, किन्तु खड्गप्रहारेण नृपस्य नासिका ............. अभवत्। अतएवोच्यते–''मूर्खजनैः सह ............. नोचिता।''



www.GOALias.blogspot.com



7. विलोमपदानि योजयत-

| | |
|---|---|
| अधः | नीचैः |
| अन्तः | सुलभम् |
| दुर्बुद्धे! | उपरि |
| उच्चैः | बहिः |
| दुर्लभम् | सुबुद्धे! |



**ध्यातव्यम्-**

अस्मिन् पाठे अधः, अन्तः, बहिः, नीचैः, पुनः इत्यादीनि अव्ययपदानि सन्ति। एषां त्रिषु लिङ्गेषु, त्रिषु वचनेषु सर्वासु विभक्तिषु च एकमेव रूपं भवति, विकारो न जायते।

उक्तञ्च-

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

www.GOALias.blogspot.com

## पञ्चमः पाठः

# पण्डिता रमाबाई



रमाबाई संस्कृतवैदुष्येण 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां विभूषिता। सा 1858 तमे ख्रिष्टाब्दे जन्म अलभत। तस्याः पिता अनन्तशास्त्री डोंगरे माता च लक्ष्मी बाई आस्ताम्। तस्मिन् काले स्त्रीशिक्षायाः स्थितिः चिन्तनीया आसीत्। स्त्रीणां कृते संस्कृतशिक्षणं प्रायः प्रचलितं नासीत्। किन्तु पण्डितः अनन्तशास्त्री डोंगरे रूढिबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतमध्यापयत्। एतदर्थं रमायाः पिता समाजस्य प्रतारणाम् अपि असहत। अनन्तरं रमा अपि स्वमातुः संस्कृतशिक्षां प्राप्तवती।

कालक्रमेण रमायाः पिता विपन्नः सञ्जातः। तस्याः पितरौ ज्येष्ठा भगिनी च दुर्भिक्षपीडिताः दिवङ्गताः। तदनन्तरं रमा स्व-ज्येष्ठभ्रात्रा सह पद्भ्यां समग्रे भारते भ्रमणं कुर्वती कोलकातां प्राप्ता। तत्र सा ब्रह्मसमाजेन प्रभाविता वेदाध्ययनम् अकरोत्। पश्चात् सा बालिकानां स्त्रीणां च कृते संस्कृतस्य वेदशास्त्रादिकस्य च शिक्षायै आन्दोलनं प्रारब्धवती। 1880 तमे ख्रिष्टाब्दे सा विपिनबिहारीदासेन सह न्यायालये विवाहम् अकरोत्। सार्द्धैकवर्षानन्तरं तस्याः पतिः दिवङ्गतः।

तदनन्तरं सा पुत्र्या मनोरमया सह महाराष्ट्रं प्रत्यागच्छत्। नारीणां समुचितसम्मानाय शिक्षायै च सा स्वकीयं जीवनम् अर्पितवती। सर्वकारेण संघटिते उच्चशिक्षा-आयोगे रमाबाई नारीशिक्षाविषये स्वमतं प्रस्तुतवती। सा उच्चशिक्षार्थम् इंग्लैण्डदेशं गतवती। तत्र ईसाईधर्मस्य स्त्रीविषयकैः उत्तमविचारैः प्रभाविता जाता।

www.GOALias.blogspot.com



इंग्लैण्डदेशात् रमाबाई अमरीकादेशम् अगच्छत्। तत्र सा भारतस्य विधवास्त्रीणां सहायतार्थम् अर्थसञ्चयम् अकरोत्। भारतं प्रत्यागत्य मुम्बईनगरे सा 'शारदा-सदनम्' अस्थापयत्। परम् इदं सदनं पुणेनगरे स्थानान्तरितं जातम्। अस्मिन् आश्रमे निस्सहायाः स्त्रियः निवसन्ति स्म। तत्र स्त्रियः मुद्रण-टङ्कण-काष्ठकलादीनाञ्च प्रशिक्षणमपि लभन्ते स्म। तदनन्तरं पुणेनगरस्य समीपे केडगाँव-नाम्नि स्थाने 'मुक्तिमिशन' नाम संस्थानं तया स्थापितम्। अत्र अधुना अपि निराश्रिताः स्त्रियः ससम्मानं जीवनं यापयन्ति।




1922 तमे ख्रिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्। किन्तु स्त्रीशिक्षायां समाजसेवायाञ्च तस्याः कार्यम् अविस्मरणीयम् अस्ति। समाजसेवायाः अतिरिक्तं लेखनक्षेत्रे अपि तस्याः महत्त्वपूर्णम् अवदानम् अस्ति। 'स्त्रीधर्मनीति' 'हाई कास्ट हिन्दू विमेन' इति तस्याः प्रसिद्धं रचनाद्वयं वर्तते।

## शब्दार्थाः

| | | |
|---|---|---|
| **संस्कृतवैदुष्येण** | – | संस्कृत की विद्वत्ता से |
| **उपाधिभ्याम्** | – | उपाधियों से |
| **परित्यज्य** | – | छोड़कर |
| **अध्यापयत्** | – | पढ़ाया |
| **प्रतारणाम्** | – | ताड़ना |
| **असहत** | – | सहन किया |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **स्वमातुः** | – | अपनी माता से |
| **नवीनोपक्रमस्य** (नवीन + उपक्रमस्य) | – | नए प्रयास का |
| **विपन्नः** | – | निर्धन |
| **दिवङ्गताः** | – | मृत्यु को प्राप्त हो गए |
| **कुर्वती** | – | करती हुई |
| **प्रारब्धवती** | – | आरम्भ किया |
| **प्रत्यागच्छत्** (प्रति + आगच्छत्) | – | लौट आई |
| **संघटिते** | – | संगठित |
| **अर्थसञ्चयम्** | – | धन सञ्चय |
| **प्रत्यागत्य** (प्रति + आगत्य) | – | लौटकर |
| **मुद्रणम्** | – | छपाई |
| **टङ्कणम्** | – | टाइप |
| **निराश्रिताः** (निर् + आश्रिताः) | – | बेसहारा |
| **यापयन्ति** | – | बिताते/बिताती हैं |
| **अवदानम्** | – | योगदान |

## अभ्यासः



1. **एकपदेन उत्तरत–**

(क) 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां का विभूषिता?

(ख) रमा कुतः संस्कृतशिक्षां प्राप्तवती?

(ग) रमाबाई केन सह विवाहम् अकरोत्?

(घ) कासां शिक्षायै रमाबाई स्वकीयं जीवनम् अर्पितवती?

(ङ) रमाबाई उच्चशिक्षार्थं कुत्र अगच्छत्?

www.GOALias.blogspot.com



**2. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) रमाया: पिता समाजस्य प्रतारणाम् असहत।

(ख) पत्यु: मरणानन्तरं रमाबाई महाराष्ट्रं प्रत्यागच्छत्।

(ग) रमाबाई मुम्बईनगरे 'शारदा–सदनम्' अस्थापयत्।

(घ) 1922 तमे ख्रिष्टाब्दे रमाबाई–महोदयाया: निधनम् अभवत्।

(ङ) स्त्रिय: शिक्षां लभन्ते स्म।

**3. प्रश्नानामुत्तराणि लिखत–**

(क) रमाबाई किमर्थम् आन्दोलनं प्रारब्धवती?

(ख) नि:सहाया: स्त्रिय: आश्रमे किं लभन्ते स्म?

(ग) कस्मिन् विषये रमाबाई–महोदयाया: योगदानम् अस्ति?

(घ) केन रचनाद्वयेन रमाबाई प्रशंसिता वर्तते?

**4. अधोलिखितानां पदानां निर्देशानुसारं पदपरिचयं लिखत–**

| पदानि | मूलशब्द: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|
| यथा–वेदानाम् | वेद | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |
| पिता | ............... | ............... | ............... | ............... |
| शिक्षायै | ............... | ............... | ............... | ............... |
| कन्या: | ............... | ............... | ............... | ............... |
| पद्भ्याम् | ............... | ............... | ............... | ............... |
| मनोरमया | ............... | ............... | ............... | ............... |

**5. अधोलिखितानां धातूनां लकारं पुरुषं वचनञ्च लिखत–**

| | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा–आसीत् | अस् | लङ् | प्रथमपुरुष: | एकवचनम् |
| कुर्वन्ति | ............... | ............... | ............... | ............... |

www.GOALias.blogspot.com



| | | | | |
|---|---|---|---|---|
| आगच्छत् | ................ | ................ | ................ | ................ |
| निवसन्ति | ................ | ................ | ................ | ................ |
| गमिष्यति | ................ | ................ | ................ | ................ |
| अकरोत् | ................ | ................ | ................ | ................ |

**6. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत-**

(क) रमाबाई-महोदयायाः विपिनबिहारीदासेन सह विवाहः अभवत्।

(ख) 1858 तमे ख्रिष्टाब्दे रमाबाई जन्म अलभत।

(ग) सा उच्चशिक्षार्थं इंग्लैण्डदेशं गतवती।

(घ) 1922 तमे ख्रिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।

(ङ) सा मुम्बईनगरे शारदा-सदनम् अस्थापयत्।

(च) सा स्वमातुः संस्कृतशिक्षां प्राप्तवती।

www.GOALias.blogspot.com

## षष्ठः पाठः



# सदाचारः

यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥1॥

प्रातःकाले त्यजेच्छय्यामीश्वरं प्रथमं स्मरेत् ।
नित्यकर्माणि कृत्वा च कुर्यादध्ययनं ततः ॥2॥

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः ॥3॥

सर्वदा व्यवहारे स्यात् औदार्यं सत्यता तथा ।
ऋजुता मृदुता चापि कौटिल्यं न कदाचन ॥4॥

श्रेष्ठं जनं गुरुं चापि मातरं पितरं तथा ।
मनसा कर्मणा वाचा सेवेत सततं सदा ॥5॥

मित्रेण कलहं कृत्वा न कदापि सुखी जनः ।
इति ज्ञात्वा प्रयासेन तदेव परिवर्जयेत् ॥6॥

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **आचारः** | – | व्यवहार |
| **पारम्पर्यक्रमागतः** | – | परम्पराक्रम से आया हुआ/प्राप्त |
| **वर्णानाम्** | – | समस्त वर्गों का |
| **सान्तरालानाम्** | – | वर्गों के मध्य आये समस्त उपवर्गों का |
| **त्यजेत्** | – | छोड़ना चाहिए, त्यागना चाहिए |
| **कुर्यात्** | – | करना चाहिए |
| **ब्रूयात्** | – | बोलना चाहिए |
| **अनृतम्** | – | झूठ |
| **सनातनः** | – | सदा से चला आ रहा हो |
| **स्यात्** | – | हो |
| **औदार्यम्** | – | उदारता |
| **ऋजुता** | – | सरलता |
| **मृदुता** | – | कोमलता |
| **कौटिल्यम्** | – | कुटिलता, टेढ़ापन |
| **वाचा** | – | वाणी से |
| **सेवेत** | – | सेवा करनी चाहिए |
| **परिवर्जयेत्** | – | छोड़ देना चाहिए |

www.GOALias.blogspot.com



## अभ्यासः



1. सर्वान् श्लोकान् सस्वरं गायत।

2. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

(क) प्रातः काले ईश्वरं स्मरेत्। [ ]

(ख) अनृतं ब्रूयात्। [ ]

(ग) मनसा श्रेष्ठजनं सेवेत। [ ]

(घ) मित्रेण कलहं कृत्वा जनः सुखी भवति। [ ]

(ङ) प्रातःकाले शय्यां न त्यजेत्। [ ]

3. एकपदेन उत्तरत-

(क) कदा शय्यां त्यजेत्?

(ख) कानि कृत्वा अध्ययनं कुर्यात्?

(ग) किं ब्रूयात्?

(घ) केन सह कलहं कृत्वा नरः सुखी न भवेत्?

4. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

(क) प्रथमम् <u>ईश्वरं</u> स्मरेत्।

(ख) <u>कलहं</u> कृत्वा नरः दुःखी भवति।

(ग) <u>पितरं</u> कर्मणा सेवेत।

(घ) व्यवहारे <u>मृदुता</u> श्रेयसी।

(ङ) <u>सर्वदा</u> व्यवहारे ऋजुता विधेया।

www.GOALias.blogspot.com



5. प्रश्नमध्ये त्रीणि क्रियापदानि सन्ति। तानि प्रयुज्य सार्थक-वाक्यानि रचयत।




(क) ......................................। (ख) ......................................।

(ग) ......................................। (घ) ......................................।

(ङ) ......................................। (च) ......................................।

(छ) ......................................। (ज) ......................................।

6. मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत–

| तथा | न | कदाचन | सदा | च | अपि |
|---|---|---|---|---|---|

(क) भक्तः .............. ईश्वरं स्मरति।

(ख) असत्यं .............. वक्तव्यम्।

www.GOALias.blogspot.com



(ग) प्रियं ............... सत्यं वदेत्।

(घ) लता मेधा ............... विद्यालयं गच्छतः।

(ङ) ............... कुशली भवान्?

(च) महात्मागान्धी ............... अहिंसां न अत्यजत्।

**7. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत-**



| | | | | | |
|---|---|---|---|---|---|
| लिखति | कक्षायाम् | श्यामपट्टे | लिखन्ति | सः | पुस्तिकायाम् |
| शिक्षकः | छात्राः | उत्तराणि | प्रश्नम् | ते | |

.........................................................................................................

.........................................................................................................

.........................................................................................................

www.GOALias.blogspot.com

सप्तमः पाठः

# सङ्कल्पः सिद्धिदायकः

धातुप्रयोगः

नारदवचनप्रभावात् पार्वती शिवं पतिरूपेण इच्छन्ती तपस्यां कर्त्तुम् इच्छति स्म। सा स्वसङ्कल्पं मात्रे न्यवेदयत्। तच्छ्रुत्वा पार्वत्याः माता चिन्ताकुला अभवत्।

पुत्र्याः कोमलतनुं दृष्ट्वा जननी आदिशत्–'वत्से! क्व कठिनं तपः क्व च तव कोमलं शरीरम्? कथम् आतपात् शीतात् वा आत्मानं रक्षिष्यसि? तर्हि तपः मा चर। सुखेन स्वगृहे एव वस। अत्रैव व्रतादिकं कुरु। एतेनैव तव मनोरथपूर्तिः भविष्यति।'

परन्तु पार्वती अकथयत्–''अम्ब! शिवं पतिरूपेण प्राप्तुं तपस्यामेव करिष्यामि इति मे सङ्कल्पः। ईश्वरः मम रक्षां करिष्यति। तपस्यार्थं कोऽपि न गृहे वसति।'' एवमुक्त्वा दृढनिश्चया सा पितृगृहं परित्यज्य कानने निर्मितां स्वपर्णकुटीम् अगच्छत् शिवं च अनन्यमनसा अपूजयत्, चिरं तपस्यां च समाचरत्। कानने हिंस्राः पशवः विचरन्ति स्म। तथापि पार्वती निर्भया वसति स्म। यतो हि निर्भयं जनम् ईश्वरः स्वयमेव रक्षति।



कतिचित् मासाः गताः। एकदा कश्चित् वटुः तपोवनं प्राविशत्। वटुं दृष्ट्वा पार्वती आसनात् उत्थाय तमुपगम्य सादरम् अवदत्–''वटो, स्वागतं ते। उपविशतु भवान्।''

www.GOALias.blogspot.com



वटुः कुशलं पृष्ट्वा कौतूहलेन अपृच्छत्-''हे तपस्विनि! किमर्थं कठिनं तपः समाचरसि? स्वकीयां तनुं च मलिनां करोषि?'' पार्वती न किञ्चित् वदति स्म। तत्सखी एव तस्याः सङ्कल्पस्य प्रयोजनं वटवे निवेदयति स्म।

तत् श्रुत्वा वटुः अपृच्छत्-''अयि पार्वति! किं सत्यमेव त्वं शिवं पतिमिच्छसि यो हि अशिवं चरति, श्मशाने वसति? यस्य त्रीणि नेत्राणि, यस्य वसनं गजचर्म, यस्य अङ्गरागः चिताभस्म, यस्य परिजनाश्च भूतगणाः, किं तमेव शिवं पतिम् इच्छसि?''

शिवनिन्दां श्रुत्वा पार्वती क्रुद्धा जाता। सा अवदत्-''अपसर अरे वाचाल! त्वं महेश्वरस्य परमार्थस्वरूपमेव न जानासि। जनाः अनादिकालात् सङ्कल्पसिद्धये शिवमेव पूजयन्ति। तत् नोचितं त्वया सह सम्भाषणम्।''



एवमुक्त्वा यदा सा प्रस्थानाय उद्यता, तावदेव शिवः वटोः रूपं परित्यज्य तस्याः मार्गम् अवरुध्य अवदत्-''पार्वति! प्रीतोऽस्मि तव सङ्कल्पेन तपस्यया च।''

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **इच्छन्ती** | – | इच्छा करती हुई |
| **कर्त्तुम्** | – | करने के लिए |
| **इच्छति स्म** | – | इच्छा की |
| **मात्रे** | – | माता से/माता को |
| **तच्छ्रुत्वा** (तत् + श्रुत्वा) | – | यह सुनकर |
| **पुत्र्याः** | – | पुत्री का/के/की |
| **आदिशत्** | – | आदेश दिया |
| **क्व** | – | कहाँ |
| **आतपात्** | – | धूप से |
| **आत्मानम्** | – | स्वयं को |
| **व्रतादिकम्** (व्रत + आदिकम्) | – | उपवास आदि को |
| **अम्ब!** | – | हे माँ! |
| **प्राप्तुम्** | – | प्राप्त करने के लिए |
| **तपस्यार्थम्** (तपस्या + अर्थम्) | – | तपस्या के लिए |
| **कोऽपि** (कः + अपि) | – | कोई |
| **परित्यज्य** | – | छोड़कर |
| **कानने** | – | वन में/जङ्गल में |
| **स्वपर्णकुटीम्** | – | अपने पत्तों की कुटिया में |
| **अनन्यमनसा** | – | एकाग्र चित्त से |
| **चिरम्** | – | बहुत समय तक |
| **समाचरत्** | – | करने लगी/करने लगा |
| **यतो हि** | – | क्योंकि |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **कतिचित्** | – | कुछ |
| **वटुः** | – | ब्रह्मचारी |
| **प्राविशत्** | – | प्रवेश किया/आया |
| **उत्थाय** | – | उठकर |
| **तमुपगम्य** (तम् + उपगम्य) | – | उसके पास जाकर |
| **उपविशतु** | – | बैठो/बैठे |
| **पृष्ट्वा** | – | पूछकर |
| **समाचरसि** | – | करती हो/करते हो |
| **वदति स्म** | – | बोलती थी/बोलता था |
| **अशिवम्** | – | अमङ्गल |
| **वसनम्** | – | कपड़ा/वस्त्र |
| **गजचर्म** | – | हाथी का चमड़ा |
| **अङ्गरागः** | – | सौन्दर्य सामग्री |
| **परिजनाश्च** (परिजनाः + च) | – | सेवक आदि |
| **भूतगणाः** | – | भूतप्रेत आदि |
| **अपसर** | – | दूर हटो |
| **परमार्थस्वरूपमेव** (परम + अर्थस्वरूपम् + एव) | – | दिव्य रूप को ही/यथार्थ स्वरूप को ही |
| **सङ्कल्पसिद्धये** | – | सङ्कल्प को पूरा करने के लिए |
| **नोचितम्** (न + उचितम्) | – | उचित (ठीक) नहीं है |
| **प्रस्थानाय** | – | जाने के लिए |
| **उद्यता** | – | तैयार हुई |
| **तावदेव** (तावत् + एव) | – | तभी |
| **अवरुध्य** | – | रोककर |
| **प्रीतोऽस्मि** (प्रीतः + अस्मि) | – | प्रसन्न हूँ |

www.GOALias.blogspot.com



## अभ्यासः



**1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| अभवत् | अकथयत् | अगच्छत् |
| न्यवेदयत् | अपूजयत् | समाचरत् |
| आदिशत् | प्राविशत् | अवदत् |
| वदति स्म | वसति स्म | रक्षति स्म |
| निवेदयति स्म | चरति स्म | करोति स्म |
| गच्छति स्म | पूजयति स्म | पठति स्म |

**2. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत-**

**(क)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | वसति स्म | वसतः स्म | वसन्ति स्म |
| | पूजयति स्म | ................. | ................. |
| | ................. | रक्षतः स्म | ................. |
| | चरति स्म | ................. | ................. |
| | ................. | ................. | कुर्वन्ति स्म |

**(ख)**

| | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | प्रथमपुरुषः | अकथयत् | अकथयताम् | अकथयन् |
| | प्रथमपुरुषः | ................. | अपूजयताम् | अपूजयन् |
| | प्रथमपुरुषः | अरक्षत् | ................. | ................. |

www.GOALias.blogspot.com



| (ग) पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- मध्यमपुरुषः | अवसः | अवसतम् | अवसत |
| मध्यमपुरुषः | ................. | अपूजयतम् | ................. |
| मध्यमपुरुषः | ................. | ................. | अचरत |

| (घ) पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |
| उत्तमपुरुषः | अलिखम् | ................. | ................. |
| उत्तमपुरुषः | ................. | अरचयाव | ................. |

3. **प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

(क) निर्भयं जनं कः स्वयमेव रक्षति?

(ख) पार्वती तपस्यार्थं कुत्र अगच्छत्?

(ग) कः अशिवं चरति?

(घ) शिवनिन्दां श्रुत्वा का क्रुद्धा जाता?

(ङ) वटुरूपेण तपोवनं कः प्राविशत्?

4. **कः/का कं/कां प्रति कथयति-**

| | कः/का | कम्/काम् |
|---|---|---|
| यथा- वत्से! क्व कठिनं तपः? | माता | पार्वतीम् |
| (क) अम्ब! पतिरूपेण शिवं प्राप्तुं तपस्यां करिष्यामि। | ............. | ............. |
| (ख) अत्रैव व्रतादिकं कुरु। | ............. | ............. |
| (ग) अयि पार्वति! सत्यमेव त्वं शिवं पतिमिच्छसि? | ............. | ............. |
| (घ) अपसर, अरे वाचाल! | ............. | ............. |
| (ङ) पार्वति! प्रीतोऽस्मि तव तपस्यया। | ............. | ............. |

www.GOALias.blogspot.com



**5. प्रश्नानाम् उत्तराणि लिखत-**

(क) वटुं दृष्ट्वा पार्वती सादरं किम् अवदत्?

(ख) वटुः पार्वतीं किम् अपृच्छत्?

(ग) नारदवचनप्रभावात् पार्वती किं कर्त्तुम् ऐच्छत्?

**6. मञ्जूषातः पदानि चित्वा समानार्थकानि पदानि लिखत-**

| | | | | |
|---|---|---|---|---|
| माता | दृष्ट्वा | कानने | जन्तवः | नेत्राणि |

वने ..................

पशवः ..................

जननी ..................

नयनानि ..................

विलोक्य ..................

**7. उदाहरणानुसारं पदरचनां कुरुत-**

**यथा -** वसति स्म = अवसत्

(क) पश्यति स्म = ....................

(ख) लिखति स्म = ....................

(ग) चिन्तयति स्म = ....................

(घ) वदति स्म = ....................

(ङ) गच्छति स्म = ....................

www.GOALias.blogspot.com



| | | |
|---|---|---|
| यथा– अलिखत् | = | लिखति स्म। |
| (क) ................ | = | कथयति स्म। |
| (ख) ................ | = | नयति स्म। |
| (ग) ................ | = | पठति स्म। |
| (घ) ................ | = | धावति स्म। |
| (ङ) ................ | = | हसति स्म। |



**ध्यातव्यम्–**

**'स्म' इत्यस्य प्रयोगः।**

**यदा वर्तमानकालिकैः धातुभिः सह 'स्म' इत्यस्य प्रयोगः भवति तदा ते धातवः भूतकालिकक्रियाणाम् अर्थं प्रकटयन्ति।**

| | | | |
|---|---|---|---|
| **यथा–** | **पठति स्म** | – | **पढ़ता था।** |
| | **गच्छति स्म** | – | **जाता था।** |

www.GOALias.blogspot.com

## अष्टमः पाठः

# त्रिवर्णः ध्वजः

*(केचन बालकाः काश्चन बालिकाश्च स्वतन्त्रता-दिवसस्य ध्वजारोहणसमारोहे सोत्साहं गच्छन्तः परस्परं संलपन्ति।)*

देवेशः – अद्य स्वतन्त्रता-दिवसः। अस्माकं विद्यालयस्य प्राचार्यः ध्वजारोहणं करिष्यति। छात्राश्च सांस्कृतिककार्यक्रमान् प्रस्तोष्यन्ति। अन्ते च मोदकानि मिलिष्यन्ति।



डेविडः – शुचे! जानासि त्वम्? अस्माकं ध्वजस्य किं नाम?

शुचिः – अरे! कः एतादृशः भारतीयः यः अस्य ध्वजस्य विषये न जानाति? अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

सलीमः – रुचे! अस्य नाम त्रिवर्णः कथम्?

रुचिः – अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि?

सलीमः – अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

देवेशः – अस्माकं ध्वजे एते त्रयः एव वर्णाः कथं गृहीताः?

www.GOALias.blogspot.com



**सलीमः** – एतेषां त्रयाणां वर्णानाम् अत्र विशेषः अभिप्रायः।

**देवेशः** – कः विशेषः?

**सलीमः** – शृणु, केशरवर्णः शौर्यस्य, श्वेतः शान्तेः, हरितश्च समृद्धेः सूचकाः सन्ति। स्वयं च अयं ध्वजः अनेकत्वे एकत्वस्य द्योतकः।

**शुचिः** – किम् एतासां पट्टिकानाम् अन्यदपि महत्त्वम्?

**डेविडः** – आम्! कथं न? ध्वजस्य उपरि स्थिता केशरपट्टिका अग्निशिखा इव ऊर्जस्वितायाः उत्साहस्य च सूचिका। मध्ये स्थिता श्वेतपट्टिका सात्त्विकतायाः निर्मलतायाः च द्योतिका। अधः स्थिता हरितपट्टिका समृद्धेः प्रगतेश्च सङ्केतिका।

**तेजिन्दरः** – शुचे! ध्वजस्य मध्ये स्थितस्य चक्रस्य किमपि महत्त्वम् अस्ति?

**शुचिः** – अथ किम् इदम् अशोकचक्रं सत्यस्य, धर्मस्य अहिंसायाश्च द्योतकम्।

**प्रणवः** – किं न जानासि? स्वतन्त्रतायाः आन्दोलने अस्य ध्वजस्य महती भूमिका आसीत्।

**शुचिः** – का सा ध्वजस्य भूमिका?

**देवेशः** – एनं ध्वजम् आश्रित्य एव स्वतन्त्रतायाः आन्दोलनम् अभवत्।

**डेविडः** – देशस्य स्वतन्त्रतायै लक्ष्मीबाई, महात्मागान्धी, पं. जवाहरलालनेहरू, सुभाषचन्द्रबोसः, आजादः चन्द्रशेखरः, भगतसिंहः, सरोजिनी नायडू, अरुणा आसफ अली इत्यादयः आजीवनं संघर्षम् अकुर्वन्। लक्षाधिकाः च जनाः स्वान् प्राणान् अपि अत्यजन्।

**तेजिन्दरः** – अस्माकं त्रिवर्णः ध्वजः स्वाभिमानस्य प्रतीकः। सर्वैः अपि भारतीयैः अस्य सम्मानः करणीयः। अतः अस्माकं सङ्कल्पः स्यात् यत् अस्य राष्ट्रध्वजस्य सम्मानरक्षार्थं वयं सर्वे स्व-स्व-कर्तव्ये तत्पराः भवेम।

जयतु त्रिवर्णः ध्वजः, जयतु भारतम्।

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **त्रिवर्णः ध्वजः** | - | तीन रंगों वाला झंडा (तिरंगा झंडा) |
| **संलपन्ति** | - | वार्तालाप करते हैं/करती हैं |
| **प्रस्तोष्यन्ति** | - | प्रस्तुत करते हैं/करती हैं |
| **मोदकानि** | - | लड्डू |
| **शौर्यस्य** | - | वीरता का/के/की |
| **ऊर्जस्वितायाः** | - | ऊर्जा की |
| **आश्रित्य** | - | सहारा लेकर |
| **लक्षाधिकाः** | - | लाखों से अधिक |

## अभ्यासः

**1. शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य समक्षं 'न' इति लिखत-**

(क) अस्माकं राष्ट्रस्य ध्वजे त्रयः वर्णाः सन्ति। [ ]

(ख) ध्वजे हरितवर्णः शान्तेः प्रतीकः अस्ति। [ ]

(ग) ध्वजे केशरवर्णः शक्त्याः सूचकः अस्ति। [ ]

(घ) स्वतन्त्रतायाः आन्दोलने लक्षाधिकाः जनाः स्वप्राणान् अत्यजन्। [ ]

(ङ) अस्माकं ध्वजः अनेकत्वे एकत्वस्य सूचकः। [ ]

www.GOALias.blogspot.com



**2. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत–**

| पदानि | विभक्तिः | वचनम् |
|---|---|---|
| यथा– | त्रयाणाम् | षष्ठी बहुवचनम् |
| समृद्धेः | ................. | ................. |
| वर्णानाम् | ................. | ................. |
| उत्साहस्य | ................. | ................. |
| नागरिकैः | ................. | ................. |
| पट्टिकानाम् | ................. | ................. |
| प्राणानाम् | ................. | ................. |

**3. एकपदेन उत्तरत–**

(क) अस्माकं ध्वजे कति वर्णाः सन्ति?

(ख) त्रिवर्णे ध्वजे शक्त्याः सूचकः कः वर्णः?

(ग) अशोकचक्रं कस्य द्योतकम् अस्ति?

(घ) त्रिवर्णः ध्वजः कस्य प्रतीकः?

**4. एकवाक्येन उत्तरत–**

(क) अस्माकं ध्वजस्य श्वेतवर्णः कस्य सूचकः अस्ति?

(ख) स्वतन्त्रतायाः आन्दोलने कस्य महती भूमिका आसीत्?

(ग) अस्माभिः कस्य मानसम्मानरक्षा करणीया?

(घ) ध्वजस्य श्वेतपट्टिका कस्याः सूचिका अस्ति?

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) अस्माकं <u>त्रिवर्णध्वजः</u> विश्वविजयी भवेत्।

(ख) स्वधर्मात् <u>प्रमादं</u> वयं न कुर्याम।

www.GOALias.blogspot.com



(ग) एतत् सर्वम् अस्माकं नेतॄणां सद्बुद्धेः सत्फलम्।

(घ) शत्रूणां समक्षं विजयः सुनिश्चितः भवेत्।

## 6. उदाहरणानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयत-

| | शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा- | पट्टिका | षष्ठी | पट्टिकायाः | पट्टिकयोः | पट्टिकानाम् |
| | अग्निशिखा | सप्तमी | अग्निशिखायाम् | ................. | ................. |
| | ऊर्जा | चतुर्थी | ................. | ऊर्जाभ्याम् | ................. |
| | अहिंसा | द्वितीया | अहिंसाम् | ................. | ................. |
| | सफलता | पञ्चमी | ................. | सफलतयोः | ................. |
| | सूचिका | तृतीया | सूचिकया | ................. | ................. |

## 7. समुचितमेलनं कृत्वा लिखत-

| क | ख |
|---|---|
| केशरवर्णः | ऊर्जस्वितायाः उत्साहस्य च सूचिका |
| अशोकचक्रम् | समृद्धेः सूचकः |
| श्वेतवर्णः | सात्त्विकतायाः निर्मलतायाः च सूचिका |
| श्वेतपट्टिका | सत्यस्य, धर्मस्य अहिंसायाश्च द्योतकम् |
| हरितवर्णः | शौर्यस्य सूचकः |
| केशरपट्टिका | समृद्धेः गतेः च संकेतिका |
| हरितपट्टिका | शान्तेः सूचकः |

www.GOALias.blogspot.com

नवमः पाठः

# विमानयानं रचयाम



राघव! माधव! सीते! ललिते!
विमानयानं रचयाम ।
नीले गगने विपुले विमले
वायुविहारं करवाम ॥1॥

उन्नतवृक्षं तुङ्गं भवनं
क्रान्त्वाकाशं खलु याम ।
कृत्वा हिमवन्तं सोपानं
चन्दिरलोकं प्रविशाम ॥2॥

शुक्रश्चन्द्रः सूर्यो गुरुरिति
ग्रहान् हि सर्वान् गणयाम ।
विविधाः सुन्दरताराश्चित्वा
मौक्तिकहारं रचयाम ॥3॥

अम्बुदमालाम् अम्बरभूषाम्
आदायैव हि प्रतियाम ।
दुःखित-पीडित-कृषिकजनानां
गृहेषु हर्षं जनयाम ॥4॥

– विश्वासः

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **विमानयानम्** | – | हवाई जहाज |
| **रचयाम** | – | (हम) बनाएँ |
| **विपुले** | – | विस्तृत (आकाश) में |
| **विमले** | – | निर्मल (आकाश) में |
| **वायुविहारम्** | – | वायुयात्रा (आकाश में यात्रा) |
| **करवाम** | – | (हम) करें |
| **उन्नतवृक्षम्** | – | ऊँचे वृक्ष को |
| **तुङ्गम्** | – | ऊँचा |
| **क्रान्त्वा** | – | पार करके |
| **याम** | – | (हम) चलें |
| **हिमवन्तं सोपानम्** | – | बर्फ की सीढ़ी को |
| **चन्दिरलोकम्** | – | चन्द्रलोक को |
| **प्रविशाम** | – | (हम) प्रवेश करें |
| **गणयाम** | – | (हम) गिनें |
| **चित्वा** | – | चुनकर |
| **मौक्तिकहारम्** | – | मोतियों के हार को |
| **अम्बुदमालाम्** | – | बादलों की माला को |
| **अम्बरभूषाम्** | – | आकाश की शोभा को |
| **आदाय** | – | लेकर |
| **प्रतियाम** | – | (हम) लौटें |
| **जनयाम** | – | (हम) उत्पन्न करें |

www.GOALias.blogspot.com



## अभ्यासः



1. **पाठे दत्तं गीतं सस्वरं गायत-**

2. **कोष्ठकान्तर्गतेषु शब्देषु तृतीया-विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-**

   **यथा-** नभः चन्द्रेण शोभते। (चन्द्र)

   (क) सा .................. जलेन मुखं प्रक्षालयति। (विमल)

   (ख) राघवः .................. विहरति। (विमानयान)

   (ग) कण्ठः .................. शोभते। (मौक्तिकहार)

   (घ) नभः .................. प्रकाशते। (सूर्य)

   (ङ) पर्वतशिखरम् .................. आकर्षकं दृश्यते। (अम्बुदमाला)

3. **भिन्नवर्गस्य पदं चिनुत-**

| | **भिन्नवर्गः** |
|---|---|
| **यथा-** सूर्यः, चन्द्रः, अम्बुदः, शुक्रः। | अम्बुदः |
| (क) पत्राणि, पुष्पाणि, फलानि, मित्राणि। | .................. |
| (ख) जलचरः, खेचरः, भूचरः, निशाचरः। | .................. |
| (ग) गावः, सिंहाः, कच्छपाः, गजाः। | .................. |
| (घ) मयूराः, चटकाः, शुकाः, मण्डूकाः। | .................. |
| (ङ) पुस्तकालयः, श्यामपट्टः, प्राचार्यः, सौचिकः। | .................. |
| (च) लेखनी, पुस्तिका, अध्यापिका, अजा। | .................. |

4. **प्रश्नानाम् उत्तराणि लिखत-**

   (क) के वायुयानं रचयन्ति?

   (ख) वायुयानं कीदृशं वृक्षं कीदृशं भवनं च क्रान्त्वा उपरि गच्छति?

   (ग) वयं कीदृशं सोपानं रचयाम?

   (घ) वयं कस्मिन् लोके प्रविशाम?

   (ङ) आकाशे काः चित्वा मौक्तिकहारं रचयाम?

   (च) केषां गृहेषु हर्षं जनयाम?

www.GOALias.blogspot.com



5. **विलोमपदानि योजयत-**

| | |
|---|---|
| उन्नतः | पृथिव्याम् |
| गगने | असुन्दरः |
| सुन्दरः | अवनतः |
| चित्वा | शोकः |
| दुःखी | विकीर्य |
| हर्षः | सुखी |

6. **समुचितैः पदैः रिक्तस्थानानि पूरयत-**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | ............ |
| द्वितीया | ............ | ............ | गुरून् |
| तृतीया | ............ | पशुभ्याम् | ............ |
| चतुर्थी | साधवे | ............ | ............ |
| पञ्चमी | वटोः | ............ | ............ |
| षष्ठी | ............ | विष्वोः | ............ |
| सप्तमी | शिशौ | ............ | ............ |
| सम्बोधन | हे विष्णो! | ............ | ............ |

7. **पर्याय-पदानि योजयत-**

| | |
|---|---|
| गगने | जलदः |
| विमले | निशाकरः |
| चन्द्रः | आकाशे |
| सूर्यः | निर्मले |
| अम्बुदः | दिवाकरः |

www.GOALias.blogspot.com

## दशमः पाठः



# विश्वबन्धुत्वम्

*कारकविभक्तिः उपपदविभक्तिश्च*

उत्सवे, व्यसने, दुर्भिक्षे, राष्ट्रविप्लवे, शत्रुसंकटे च यः सहायतां करोति सः बन्धुः भवति। यदि विश्वे सर्वत्र एतादृशः भावः भवेत् तदा विश्वबन्धुत्वं सम्भवति।

परन्तु अधुना निखिले संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति। येन मानवाः परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषाम् उपरि स्वकीयं प्रभुत्वं च स्थापयन्ति। तस्मात् कारणात् संसारे सर्वत्र विद्वेषस्य, शत्रुतायाः, हिंसायाः च भावना दृश्यते। देशानां विकासः अपि अवरुद्धः भवति।

एतेषां सर्वेषां कारणं विश्वबन्धुत्वस्य अभाव एव। इयम् महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात्। यदि इयं भावना विश्वस्य जनेषु बलवती स्यात् तदा विकसिताविकसितदेशयोः मध्ये स्वस्था स्पर्धा भविष्यति। येन सर्वे देशाः ज्ञानविज्ञानयोः क्षेत्रे मैत्रीभावनया सहयोगेन च समृद्धिं प्राप्तुं समर्थाः भविष्यन्ति।

अस्माभिः अवश्यं ध्यातव्यं यत् विश्वस्य सर्वेषु प्राणिषु समानं रुधिरं प्रसरति। सूर्यस्य चन्द्रस्य च प्रकाशः सर्वत्र समानरूपेण प्रसरति। अनेन ज्ञायते यत् प्रकृतिः अपि सर्वेषु समत्वेन व्यवहरति, तस्मात् अस्माभिः सर्वैः परस्परं वैरभावम् अपहाय विश्वबन्धुत्वं स्थापनीयम्।

www.GOALias.blogspot.com



अतः विश्वस्य कल्याणाय एतादृशी भावना भवेत्-

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

## शब्दार्थाः

| | | |
|---|---|---|
| **व्यसने** | – | संकट के समय पर |
| **दुर्भिक्षे** | – | अकाल पड़ने पर |
| **राष्ट्रविप्लवे** | – | राष्ट्र/देश पर आपदा आने पर |
| **विश्वबन्धुत्वम्** | – | विश्व के प्रति भाई–चारा |
| **विश्वसन्ति** | – | विश्वास करते हैं |
| **स्वकीयम्** | – | अपना |
| **उपेक्षाभावम्** | – | अनादर की भावना |
| **विद्वेषस्य** | – | शत्रुता का |
| **अवरुद्धः** | – | बाधित |
| **स्पर्धा** | – | होड़, मुकाबला |
| **ध्यातव्यम्** | – | ध्यान देना चाहिए |
| **रुधिरम्** | – | खून, रक्त |
| **प्रसरति** | – | फैलता है |
| **ज्ञायते** | – | जाना जाता है |
| **समत्वेन** | – | समान भावना |
| **अपहाय** | – | छोड़कर |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **परो वेति** | – | अथवा पराया |
| **लघुचेतसाम्** | – | क्षुद्र हृदय वालों का |
| **वसुधैव** (वसुधा + एव) | – | धरती ही |
| **कुटुम्बकम्** | – | परिवार |

## अभ्यासः



**1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| दुर्भिक्षे | राष्ट्रविप्लवे | विश्वबन्धुत्वम् |
| विश्वसन्ति | उपेक्षाभावम् | विद्वेषस्य |
| ध्यातव्यम् | दुःखभाक् | प्रदर्शयन्ति |

**2. मञ्जूषातः समानार्थकपदानि चित्वा लिखत-**

परस्य दुःखम् आत्मानम् बाधितः परिवारः सम्पन्नम् त्यक्त्वा सम्पूर्णे

स्वकीयम् ..................

अवरुद्धः ..................

कुटुम्बकम् ..................

अन्यस्य ..................

अपहाय ..................

समृद्धम् ..................

कष्टम् ..................

निखिले ..................

www.GOALias.blogspot.com



### 3. रेखाङ्कितानि पदानि संशोध्य लिखत-

(क) छात्राः क्रीडाक्षेत्रे <u>कन्दुकात्</u> क्रीडन्ति।

(ख) <u>ते</u> बालिकाः मधुरं गायन्ति।

(ग) अहं <u>पुस्तकालयेन</u> पुस्तकानि आनयामि।

(घ) <u>त्वं</u> किं नाम?

(ङ) <u>गुरुं</u> नमः।

### 4. मञ्जूषातः विलोमपदानि चित्वा लिखत-

अधुना मित्रतायाः लघुचेतसाम् गृहीत्वा दुःखिनः दानवाः

| | |
|---|---|
| शत्रुतायाः | .................... |
| पुरा | .................... |
| मानवाः | .................... |
| उदारचरितानाम् | .................... |
| सुखिनः | .................... |
| अपहाय | .................... |

### 5. अधोलिखितपदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| बन्धुः | .................... | .................... | .................... |
| देशान् | .................... | .................... | .................... |
| घृणायाः | .................... | .................... | .................... |

www.GOALias.blogspot.com



| | | | |
|---|---|---|---|
| कुटुम्बकम् | ...................... | ...................... | ...................... |
| रक्षायाम् | ...................... | ...................... | ...................... |
| रुधिरम् | ...................... | ...................... | ...................... |

6. **कोष्ठकेषु दत्तेषु शब्देषु समुचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-**

(क) विद्यालयम् उभयतः वृक्षाः सन्ति। (विद्यालय)

........................ उभयतः गोपालिकाः। (कृष्ण)

(ख) ग्रामं परितः गोचारणभूमिः। (ग्राम)

........................ परितः भक्ताः। (मन्दिर)

(ग) सूर्याय नमः। (सूर्य)

........................ नमः। (गुरु)

(घ) वृक्षस्य उपरि खगाः। (वृक्ष)

........................ उपरि सैनिकः। (अश्व)

7. **कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानानि पूरयत-**

(क) .................. नमः। (हरिं/हरये)

(ख) .................. परितः कृषिक्षेत्राणि सन्ति। (ग्रामस्य/ग्रामम्)

(ग) .................. नमः। (अम्बायाः/अम्बायै)

(घ) .................. उपरि अभिनेता अभिनयं करोति। (मञ्चस्य/मञ्चम्)

(ङ) .................. उभयतः पुत्रौ स्तः। (पितरम्/पितुः)

www.GOALias.blogspot.com





**ध्यातव्यम्-**

- क्रियामादाय यत्र द्वितीयातृतीयाद्याः विभक्तयः भवन्ति, ताः 'कारकविभक्तयः' इत्युच्यन्ते। यथा-रामः ग्रामं गच्छति। बालकाः यानेन यान्ति इत्यादयः॥
- पदमाश्रित्य प्रयुक्ता विभक्तिः 'उपपदविभक्तिः' इत्युच्यते।

  यथा-ग्रामं परितः वनम्। रामेण सह लक्ष्मणः गच्छति। अत्र 'परितः' इति योगे ग्रामपदात् द्वितीया तथा च 'सह' इति योगे रामपदात् प्रयुक्ता तृतीया उपपदविभक्तिः अस्ति।

www.GOALias.blogspot.com

## एकादशः पाठः

# समवायो हि दुर्जयः

पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म। कालेन तस्याः सन्ततिः जाता। एकदा कश्चित् प्रमत्तः गजः तस्य वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्। चटकायाः नीडं भुवि अपतत्। तेन अण्डानि विशीर्णानि। अथ सा चटका व्यलपत्। तस्याः विलापं श्रुत्वा काष्ठकूटः नाम खगः दुःखेन ताम् अपृच्छत्-''भद्रे, किमर्थं विलपसि?'' इति।

चटकावदत्-''दुष्टेनैकेन गजेन मम सन्ततिः नाशिता। तस्य गजस्य वधेनैव मम दुःखम् अपसरेत्।'' ततः काष्ठकूटः तां वीणारवा-नाम्न्याः मक्षिकायाः समीपम् अनयत्। तयोः वार्तां श्रुत्वा मक्षिकावदत्-''ममापि मित्रं मण्डूकः मेघनादः अस्ति। शीघ्रं तमुपेत्य यथोचितं करिष्यामः।'' तदानीं तौ मक्षिकया सह गत्वा मेघनादस्य पुरः सर्वं वृत्तान्तं न्यवेदयताम्।



मेघनादः अवदत्-''यथाहं कथयामि तथा कुरुतम्। मक्षिके! प्रथमं त्वं मध्याह्ने तस्य गजस्य कर्णे शब्दं कुरु, येन सः नयने निमील्य स्थास्यति। तदा काष्ठकूटः चञ्चवा तस्य नयने स्फोटयिष्यति। एवं सः गजः अन्धः भविष्यति। तृषार्तः सः जलाशयं गमिष्यति। मार्गे

www.GOALias.blogspot.com



महान् गर्त्तः अस्ति। तस्य अन्तिके अहं स्थास्यामि शब्दं च करिष्यामि। मम शब्देन तं गर्तं जलाशयं मत्वा स तस्मिन्नेव गर्ते पतिष्यति मरिष्यति च।'' अथ तथाकृते सः गजः मध्याह्ने मण्डूकस्य शब्दम् अनुसृत्य महतः गर्तस्य अन्तः पतितः मृतः च। तथा चोक्तम्–

'बहूनामप्यसाराणां समवायो हि दुर्जयः'।

## शब्दार्थाः

| | | |
|---|---|---|
| **पुरा** | – | पहले, पुराने समय में |
| **शुण्डेन** | – | सूँड से |
| **नीडम्** | – | घोंसले को |
| **विशीर्णानि** | – | नष्ट हो गए |
| **तमुपेत्य** (तम् + उपेत्य) | – | उसके पास जाकर |
| **मध्याह्ने** | – | दोपहर में |
| **निमील्य** | – | बन्द करके |
| **स्थास्यति** | – | रुक जाएगा |
| **स्फोटयिष्यति** | – | फोड़ देगा |
| **तृषार्तः** (तृषा + आर्तः) | – | प्यास से पीड़ित |
| **गर्तः** | – | गड्ढा |
| **तथा कृते** | – | वैसा करने पर |
| **मण्डूकस्य** | – | मेंढक का |
| **अनुसृत्य** | – | अनुसरण करके |
| **पतितः** | – | गिर गया |
| **मृतः** | – | मर गया |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **चोक्तम्** (च + उक्तम्) | – | और कहा गया है |
| **बहूनामप्यसाराणाम्** (बहूनाम् + अपि + असाराणाम्) | – | अनेक निर्बलों का |
| **समवायः** | – | समूह, संगठन |
| **दुर्जयः** | – | कठिनता से जीतने योग्य |

## अभ्यासः



**1. प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

(क) वृक्षे का प्रतिवसति स्म?

(ख) वृक्षस्य अधः कः आगतः?

(ग) गजः केन शाखाम् अत्रोटयत्?

(घ) काष्ठकूटः चटकां कस्याः समीपम् अनयत्?

(ङ) मक्षिकायाः मित्रं कः आसीत्?

**2. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) कालेन <u>चटकायाः</u> सन्ततिः जाता।

(ख) चटकायाः <u>नीडं</u> भुवि अपतत्।

(ग) <u>गजस्य</u> वधेनैव मम दुःखम् अपसरेत्।

(घ) काष्ठकूटः <u>चञ्च्वा</u> गजस्य नयने स्फोटयिष्यति।

**3. मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत-**

| | | | | | |
|---|---|---|---|---|---|
| करिष्यामि | गमिष्यति | अनयत् | पतिष्यति | स्फोटयिष्यति | त्रोटयति |

(क) काष्ठकूटः चञ्च्वा गजस्य नयने ...................... ।

www.GOALias.blogspot.com



(ख) मार्गे स्थितः अहमपि शब्दं ………………… ।

(ग) तृषार्तः गजः जलाशयं ………………… ।

(घ) गजः गर्ते ………………… ।

(ङ) काष्ठकूटः तां मक्षिकायाः समीपं ………………… ।

(च) गजः शुण्डेन वृक्षशाखाः ………………… ।

**4. प्रश्नानाम् उत्तराणि एकवाक्येन लिखत-**

(क) चटकायाः विलापं श्रुत्वा काष्ठकूटः तां किम् अपृच्छत्?

(ख) चटकायाः काष्ठकूटस्य च वार्तां श्रुत्वा मक्षिका किम् अवदत्?

(ग) मेघनादः मक्षिकां किम् अवदत्?

(घ) चटका काष्ठकूटं किम् अवदत्?

**5. उदाहरणमनुसृत्य रिक्तस्थानानि पूरयत-**

(क)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- **प्रथमपुरुषः** | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| **प्रथमपुरुषः** | ……………… | पतिष्यतः | ……………… |
| **प्रथमपुरुषः** | ……………… | ……………… | मरिष्यन्ति |

(ख)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- **मध्यमपुरुषः** | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| **मध्यमपुरुषः** | ……………… | धाविष्यथः | ……………… |
| **मध्यमपुरुषः** | ……………… | ……………… | क्रीडिष्यथ |

www.GOALias.blogspot.com



(ग)

| | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |
| | उत्तमपुरुषः | .................. | हसिष्यावः | .................. |
| | उत्तमपुरुषः | .................. | .................. | द्रक्ष्यामः |

**6. उदाहरणानुसारं 'स्म' शब्दं योजयित्वा भूतकालिकक्रियां रचयत-**

यथा-अवसत् – वसति स्म।

अपठत् – ....................।

अत्रोटयत् – ....................।

अपतत् – ....................।

अपृच्छत् – ....................।

अवदत् – ....................।

अनयत् – ....................।

**7. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत-**

(क) .................... बालिका मधुरं गायति। (एकम्, एका, एकः)

(ख) .................... कृषकाः कृषिकर्माणि कुर्वन्ति। (चत्वारः, चतस्रः, चत्वारि)

(ग) .................... पत्राणि सुन्दराणि सन्ति। (ते, ताः, तानि)

(घ) धेनवः दुग्धं .................... । (ददाति, ददति, ददन्ति)

(ङ) वयं संस्कृतम् .................... । (अपठम्, अपठन्, अपठाम)

www.GOALias.blogspot.com

## द्वादशः पाठः



# कल्पलतेव विद्या

न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ 1 ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥ 2 ॥

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ 3 ॥

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीयखेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्
किं किं न साधयति कल्पलतेव विद्या ॥ 4 ॥

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **चौरहार्यम्** | – | चोरों के द्वारा चुराने योग्य |
| **राजहार्यम्** | – | राजा के द्वारा छीनने योग्य |
| **भ्रातृभाज्यम्** | – | भाइयों के द्वारा बाँटने योग्य |
| **भारकारि** | – | भार बढ़ाने वाली |
| **प्रच्छन्नगुप्तम्** | – | निजी (आत्मीय) गुप्त |
| **भोगकरी** | – | भोग का साधन उपलब्ध कराने वाली |
| **परा** | – | सबसे बड़ी |
| **राजसु** | – | राजाओं में |
| **केयूराः** | – | बाजूबन्द |
| **चन्द्रोज्ज्वला** (चन्द्र + उज्ज्वला) | – | चन्द्रमा के समान चमकदार |
| **विलेपनम्** | – | शरीर पर लेप करने योग्य सुगन्धित-द्रव्य (चन्दन, केसर आदि) |
| **नालङ्कृता** (न + अलङ्कृता) | – | नहीं सजाया हुआ |
| **मूर्धजाः** | – | वेणी, चोटी |
| **वाण्येका** (वाणी + एका) | – | एकमात्र वाणी |
| **समलङ्करोति** | – | अच्छी तरह सुशोभित करती है |
| **संस्कृता** | – | संस्कारयुक्त (परिष्कृत) |
| **धार्यते** | – | धारण की जाती है |
| **क्षीयन्तेऽखिलभूषणानि** (क्षीयन्ते + अखिलभूषणानि) | – | सम्पूर्ण आभूषण नष्ट हो जाते हैं |
| **हिते** | – | कल्याण में |
| **नियुङ्क्ते** | – | लगाता/लगाती है |
| **कान्तेव** (कान्ता + इव) | – | पत्नी के समान |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **चाभिरमयत्यपनीयखेदम्** (च + अभिरमयति + अपनीयखेदम्) | – | कष्ट को दूरकर आनन्दित करती है |
| **तनोति** | – | फैलाती है (वृद्धि करती है) |
| **दिक्षु** | – | दिशाओं में |
| **साधयति** | – | सफल बनाती है, सिद्ध करती है |
| **कल्पलतेव** (कल्पलता + इव) | – | कल्पलता की तरह |

## अभ्यासः



**1. उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत–**

(क) विद्या राजसु पूज्यते। ☐

(ख) वाग्भूषणं भूषणं न। ☐

(ग) विद्याधनं सर्वधनेषु प्रधानम्। ☐

(घ) विदेशगमने विद्या बन्धुजनः न भवति। ☐

(ङ) विद्या सर्वत्र कीर्तिं तनोति। ☐

**2. अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत–**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | ............... | ............... | ............... |
| गुरूणाम् | ............... | ............... | ............... |
| केयूराः | ............... | ............... | ............... |
| कीर्तिम् | ............... | ............... | ............... |
| भूषणानि | ............... | ............... | ............... |

www.GOALias.blogspot.com



## 3. श्लोकांशान् योजयत–

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | हारा न चन्द्रोज्ज्वलाः |
| केयूराः न विभूषयन्ति पुरुषम् | न भ्रातृभाज्यं न च भारकारि |
| न चौरहार्यं न च राजहार्यम् | या संस्कृता धार्यते |
| मातेव रक्षति पितेव हिते नियुङ्क्ते | विद्या–विहीनः पशुः |
| वाण्येका समलङ्करोति पुरुषम् | कान्तेव चाभिरमयत्यपनीयखेदम् |

## 4. एकपदेन प्रश्नानाम् उत्तराणि लिखत–

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

## 5. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–

(क) विद्याविहीनः <u>नरः</u> पशुः अस्ति।

(ख) <u>विद्या</u> राजसु पूज्यते।

(ग) चन्द्रोज्ज्वलाः <u>हाराः</u> पुरुषं न अलङ्कुर्वन्ति।

(घ) <u>पिता</u> हिते नियुङ्क्ते।

(ङ) विद्याधनं <u>सर्वप्रधानं</u> धनमस्ति।

(च) विद्या <u>दिक्षु</u> कीर्तिं तनोति।

www.GOALias.blogspot.com



6. पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत-

(क) गुरूणां गुरुः का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) विद्या कुत्र कीर्तिं वितनोति?

(ङ) माता पिता इव विद्या किं किं करोति?

7. मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-

| विद्या | धनम् | संस्कृता | सततम् | कुसुमम् | मूर्धजाः | पशुः | गुरुः | कान्ता |
|---|---|---|---|---|---|---|---|---|

| यथा- | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| | हाराः | अलङ्कृता | भूषणम् |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |

www.GOALias.blogspot.com

त्रयोदशः पाठः



# अमृतं संस्कृतम्

*इकारान्तस्त्रीलिङ्गः*

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा भाषास्ति। भाषेयं बह्वीनां भाषाणां जननी मता। अस्यामेव भाषायां ज्ञानविज्ञानयोः निधिः सुरक्षितोऽस्ति। यथोक्तम्– 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'।

अस्याः भाषायाः वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञाः कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदाससदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणौ अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु खगोलविज्ञानं, वास्तुशास्त्रं, रसायनशास्त्रं, ज्योतिषशास्त्रं, विमानशास्त्रं च उल्लेखनीयम्।




संस्कृतस्य इदं वैशिष्ट्यं वर्तते यत् अस्याः वाङ्मये विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति। वरिष्ठान् कनिष्ठान् च प्रति अस्माभिः कथं व्यवहर्तव्यम् इत्यस्य व्यावहारिकं ज्ञानं संस्कृतमेव ददाति। भारतसर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तयः ध्येयवाक्यरूपेण स्वीकृताः सन्ति। भारतसर्वकारस्य राजचिह्ने प्रयुक्तां सूक्तिं 'सत्यमेव जयते' सर्वे जानन्ति। एवमेव राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः ध्येयवाक्यं 'विद्ययाऽमृतमश्नुते' वर्तते।

www.GOALias.blogspot.com



केचन कथयन्ति यत् संस्कृतभाषायां केवलं धार्मिकं साहित्यम् वर्तते- एषा धारणा समीचीना नास्ति। संस्कृतग्रन्थेषु मानवजीवनाय विविधाः विषयाः समाविष्टाः सन्ति। महापुरुषाणां मतिः, उत्तमजनानां धृतिः सामान्यजनानां जीवनपद्धतिः च वर्णिताः सन्ति। अतः अस्माभिः संस्कृतम् अवश्यमेव पठनीयं येन मनुष्यस्य समाजस्य च परिष्कारः भवेत्। उक्तञ्च-

अमृतं संस्कृतं मित्र !
सरसं सरलं वचः ।
एकतामूलकं राष्ट्रे
ज्ञानविज्ञानपोषकम् ॥

## शब्दार्थाः

| | | |
|---|---|---|
| **भाषेयम्** (भाषा + इयम्) | – | यह भाषा |
| **मता** | – | मानी गई है |
| **निधिः** | – | खजाना |
| **विचार्य** | – | विचार कर |
| **सङ्गणकविशेषज्ञाः** | – | कम्प्यूटर के विशेषज्ञ |
| **वाङ्मयम्** | – | साहित्य |
| **अनुपमम्** | – | अतुलनीय |
| **जगति** | – | संसार में |
| **खगोलविज्ञानम्** | – | अन्तरिक्षविज्ञान |
| **रसायनशास्त्रम्** | – | केमिस्ट्री |
| **वरिष्ठान्** | – | अपने से बड़ों को |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **कनिष्ठान्** | – | अपने से छोटों को |
| **कथं व्यवहर्तव्यम्** | – | किस प्रकार व्यवहार करना चाहिए |
| **ध्येयवाक्यरूपेण** | – | ध्यान रखने योग्य (महत्त्वपूर्ण) वाक्य के रूप में |
| **धृतिः** | – | धैर्य |
| **एकतामूलकम्** | – | एकता का मूल |

## अभ्यासः



**1. उच्चारणं कुरुत–**

| | |
|---|---|
| बह्वीनाम् | सङ्गणकस्य |
| चिकित्साशास्त्रम् | वैशिष्ट्यम् |
| भूगोलशास्त्रम् | वाङ्मये |
| विद्यमानाः | अर्थशास्त्रम् |

**2. प्रश्नानाम् एकपदेन उत्तराणि लिखत–**

(क) का भाषा प्राचीनतमा ?

(ख) भारतीयसंस्कृतेः रक्षणं केन सम्भवति ?

(ग) चाणक्येन रचितं शास्त्रं किम् ?

(घ) कस्याः भाषायाः काव्यसौन्दर्यम् अनुपमम्?

(ङ) शून्यस्य प्रतिपादनं कः अकरोत्?

**3. प्रश्नानाम् उत्तराणि एकवाक्येन लिखत–**

(क) भारतसर्वकारस्य राजचिह्ने किं लिखितम् अस्ति ?

(ख) संस्कृतस्य वाङ्मयं कैः समृद्धमस्ति ?

www.GOALias.blogspot.com



(ग) संस्कृतस्य सूक्तयः केन रूपेण स्वीकृताः सन्ति?

(घ) अस्माभिः संस्कृतं किमर्थं पठनीयम् ?

**4. इकारान्त-स्त्रीलिङ्गशब्दरूपम् अधिकृत्य रिक्तस्थानानि पूरयत-**

| | | | |
|---|---|---|---|
| गति (प्रथमा) | गतिः | गती | गतयः |
| मति (प्रथमा) | ........ | ........ | मतयः |
| बुद्धि (द्वितीया) | बुद्धिम् | बुद्धी | बुद्धीः |
| प्रीति (द्वितीया) | ........ | प्रीती | ........ |
| नीति (तृतीया) | नीत्या | नीतिभ्याम् | नीतिभिः |
| शान्ति (तृतीया) | ........ | ........ | शान्तिभिः |
| मति (चतुर्थी) | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| प्रकृति (चतुर्थी) | ......../........ | प्रकृतिभ्याम् | ........ |
| कीर्ति (पञ्चमी) | कीर्त्याः/कीर्तेः | कीर्तिभ्याम् | कीर्तिभ्यः |
| गीति (पञ्चमी) | ......../........ | गीतिभ्याम् | ........ |
| सूक्ति (षष्ठी) | सूक्तेः/सूक्त्याः | सूक्त्योः | सूक्तीनाम् |
| कृति (षष्ठी) | ......../........ | ........ | कृतीनाम् |
| धृति (सप्तमी) | धृतौ/धृत्याम् | धृत्योः | धृतिषु |
| भीति (सप्तमी) | भीतौ/....... | ........ | ........ |
| मति (सम्बोधन) | हे मते! | हे मती! | हे मतयः! |

www.GOALias.blogspot.com



5. **रेखाङ्कितानि पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-**

(क) संस्कृते ज्ञानविज्ञानयोः निधिः सुरक्षितोऽस्ति।

(ख) संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा।

(ग) शल्यक्रियायाः वर्णनं संस्कृतसाहित्ये अस्ति।

(घ) वरिष्ठान् प्रति अस्माभिः प्रियं व्यवहर्त्तव्यम्।

6. **उदाहरणानुसारं पदानां विभक्तिं वचनञ्च लिखत-**

| पदानि | विभक्तिः | वचनम् |
|---|---|---|
| यथा-संस्कृतेः | षष्ठी | एकवचनम् |
| गतिः | .............. | .............. |
| नीतिम् | .............. | .............. |
| सूक्तयः | .............. | .............. |
| शान्त्या | .............. | .............. |
| प्रीत्यै | .............. | .............. |
| मतिषु | .............. | .............. |

7. **यथायोग्यं संयोज्य लिखत-**

| क | ख |
|---|---|
| दूरदर्शनस्य आदर्शवाक्यम् | नभः स्पृशं दीप्तम्। |
| चाणक्येन | योगक्षेमं वहाम्यहम्। |
| जीवनबीमानिगमस्य आदर्शवाक्यम् | भास्कराचार्यः। |
| शून्यस्य आविष्कर्ता | सत्यं शिवं सुन्दरम्। |
| वायुसेनायाः आदर्शवाक्यम् | अर्थशास्त्रं रचितम्। |

www.GOALias.blogspot.com





## ध्यातव्यम्-

- अस्मिन् पाठे संस्कृति-स्मृति-नीति-सूक्ति-परिस्थिति-पद्धति-दृष्टि-धृति-शान्ति-प्रीति-इत्यादयः शब्दाः प्रयुक्ताः सन्ति। एते शब्दाः गति-मति-शब्दवत् स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

- एतेषां शब्दानां चतुर्थी-पञ्चमी-षष्ठी-सप्तमी-विभक्तीनामेकवचने द्वे द्वे रूपे भवतः। यथा-गत्यै-गतये, गत्याः-गतेः, गत्याम्-गतौ।

- 

| | | |
|---|---|---|
| गणितशास्त्रम् | - | **Mathematics; Comprises Arithmetic, Algebra and Geometry** |
| चिकित्साशास्त्रम् | - | **Medical Science (Administering remedies or medicine)** |
| वास्तुशास्त्रम् | - | **Architecture** |
| रसायनशास्त्रम् | - | **Chemistry** |
| ज्योतिषशास्त्रम् | - | **Astronomy** |
| विमानशास्त्रम् | - | **Aeronautics** |

www.GOALias.blogspot.com

## चतुर्दशः पाठः

# अनारिकायाः जिज्ञासा

ऋकारान्तपुँल्लिङ्गः

बालिकायाः अनारिकायाः मनसि सर्वदा महती जिज्ञासा भवति। अतः सा बहून् प्रश्नान् पृच्छति। तस्याः प्रश्नैः सर्वेषां बुद्धिः चक्रवत् भ्रमति।

प्रातः उत्थाय सा अन्वभवत् यत् तस्याः मनः प्रसन्नं नास्ति। मनोविनोदाय सा भ्रमितुं गृहात् बहिः अगच्छत् चिरं च अभ्रमत्। भ्रमणकाले सा अपश्यत् यत् मार्गाः सुसज्जिताः सन्ति। किं कारणम् अत्र इति चिन्तयन्ती सा अस्मरत् यत् अद्य तु मन्त्री आगमिष्यति। सः किमर्थम् आगमिष्यति इति विषये तस्याः जिज्ञासाः प्रारब्धाः। ताः जिज्ञासाः शमयितुम् सा गृहं प्रत्यागच्छत् पितरं च अपृच्छत्-"पितः! मन्त्री किमर्थम् आगच्छति?" पिता अवदत्-"पुत्रि! नद्याः उपरि यः नवीनः सेतुः निर्मितः तस्य उद्घाटनार्थं मन्त्री आगच्छति।" अनारिका पुनः अपृच्छत्-"पितः! किं मन्त्री सेतोः निर्माणम् अकरोत्?" पिता अकथयत्-"न हि



www.GOALias.blogspot.com



पुत्रि, सेतोः निर्माणं कर्मकराः अकुर्वन्।'' पुनः अनारिकायाः प्रश्नः आसीत्-''यदि कर्मकराः सेतोः निर्माणम् अकुर्वन्, तदा मन्त्री किमर्थम् आगच्छति?'' पिता अवदत्-''यतोहि सः अस्माकं देशस्य मन्त्री।'' ''पितः, सेतोः निर्माणाय प्रस्तराणि कुतः आयान्ति? किं तानि मन्त्री ददाति?''

विरक्तभावेन पिता उदतरत्-''अनारिके! प्रस्तराणि जनाः पर्वतेभ्यः आनयन्ति।'' ''पितः! तर्हि किम्? एतदर्थं मन्त्री धनं ददाति? तस्य पार्श्वे धनानि कुतः आगच्छन्ति?'' एतान् प्रश्नान् श्रुत्वा पिताऽवदत्-''अरे! प्रजाः सर्वकाराय धनं प्रयच्छन्ति।'' विस्मिता अनारिका पुनरपृच्छत्-''पितः! यदि कर्मकराः पर्वतेभ्यः प्रस्तराणि आनीय सेतुं निर्मान्ति, प्रजाः सर्वकाराय धनं ददति, तर्हि मन्त्री सेतोः उद्घाटनार्थं किमर्थम् आगच्छति?''

बहून् प्रश्नान् उत्तरन् पिता अवदत्-''प्रथममेव अहम् अकथयम् यत् सः एव देशस्य मन्त्री अस्ति। बहुप्रश्नान् करोषि। चल, सुसज्जिता भूत्वा विद्यालयं गच्छ।'' इदानीम् अपि अनारिकायाः मनसि बहवः प्रश्नाः सन्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| महती | - | बड़ी |
| अन्वभवत् | - | अनुभव किया |
| मनोविनोदाय | - | मन प्रसन्न करने के लिए |
| चिन्तयन्ती | - | सोचती हुई |
| अस्मरत् | - | याद किया |
| शमयितुम् | - | शान्त करने के लिए |
| सेतुः | - | पुल |
| उदतरत् | - | उत्तर दिया |
| प्रस्तराणि | - | पत्थर |
| सर्वकाराय | - | सरकार के लिए |

www.GOALias.blogspot.com



| | | |
|---|---|---|
| **निर्मान्ति** | – | निर्माण करते हैं/बनाते हैं |
| **ददति** | – | देते हैं |
| **उत्तरन्** | – | उत्तर देता हुआ |

## अभ्यासः



**1. उच्चारणं कुरुत–**

| | | |
|---|---|---|
| मन्त्री | निर्माणम् | भ्रात्रा |
| कर्मकराः | जिज्ञासा | पित्रे |
| भ्रातृणाम् | उद्घाटनार्थम् | पितृभ्याम् |
| नेतरि | अपृच्छत् | चिन्तयन्ती |

**2. अधोलिखितानां प्रश्नानां उत्तराणि लिखत–**

(क) कस्याः महती जिज्ञासा वर्तते?

(ख) मन्त्री किमर्थम् आगच्छति?

(ग) सेतोः निर्माणं के अकुर्वन्?

(घ) सेतोः निर्माणाय कर्मकराः प्रस्तराणि कुतः आनयन्ति।

(ङ) के सर्वकाराय धनं प्रयच्छन्ति?

**3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) <u>अनारिकायाः</u> प्रश्नैः सर्वेषां बुद्धिः चक्रवत् भ्रमति।

(ख) मन्त्री सेतोः <u>उद्घाटनार्थम्</u> आगच्छति।

(ग) <u>कर्मकराः</u> सेतोः निर्माणम् कुर्वन्ति।

(घ) <u>पर्वतेभ्यः</u> प्रस्तराणि आनीय सेतोः निर्माणं भवति।

(ङ) जनाः <u>सर्वकाराय</u> देशस्य विकासार्थं धनं ददति।

www.GOALias.blogspot.com



4. उदाहरणानुसारं रूपाणि लिखत-

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः (पितृ) |
| | .......... | भ्रातरौ | .......... (भ्रातृ) |
| द्वितीया | दातारम् | दातारौ | दातॄन् (दातृ) |
| | .......... | धातारौ | .......... (धातृ) |
| तृतीया | धात्रा | .......... | धातृभिः (धातृ) |
| | .......... | कर्तृभ्याम् | .......... (कर्तृ) |
| चतुर्थी | नेत्रे | नेतृभ्याम् | नेतृभ्यः (नेतृ) |
| | विधात्रे | .......... | .......... (विधातृ) |
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः (कर्तृ) |
| | .......... | .......... | हर्तृभ्यः (हर्तृ) |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् (पितृ) |
| | .......... | भ्रात्रोः | .......... (भ्रातृ) |
| सप्तमी | सवितरि | सवित्रोः | सवितृषु (सवितृ) |
| | अभिनेतरि | .......... | .......... (अभिनेतृ) |
| सम्बोधनम् | हे जामातः! | हे जामातरौ! | हे जामातरः (जामातृ) |
| | हे नप्तः! | .......... | .......... (नप्तृ) |

5. कोष्ठकेभ्यः समुचितपदानि चित्वा रिक्तस्थानानि पूरयत-

(क) अहं प्रातः ................ सह भ्रमणाय गच्छामि। (पित्रा/पितुः)

(ख) बाला आपणात् ................ फलानि आनयति। (भ्रातुः/भ्रात्रे)

www.GOALias.blogspot.com



(ग) कर्मकराः सेतोः निर्माणस्य .................. भवन्ति। (कर्तारम्/कर्त्तारः)

(घ) मम .................. तु एतेषां प्रश्नानाम् उत्तराणि अददात्। (पिता/पितरः)

(ङ) तव .................. कुत्र जीविकोपार्जनं कुरुतः? (भ्रातरः/भ्रातरौ)

## 6. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत-



| धारयन्ति | बालाः | वसयानम् | छत्रम् | ते | आरोहन्ति | वर्षायाम् |
|---|---|---|---|---|---|---|

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

## 7. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत-

प्रश्नाः = ......................................................

नवीनः = ......................................................

प्रातः = ......................................................

आगच्छति = ......................................................

प्रसन्नः = ......................................................

www.GOALias.blogspot.com

## पञ्चदशः पाठः



# लालनगीतम्

उदिते सूर्ये धरणी विहसति ।
पक्षी कूजति कमलं विकसति ॥1॥

नदति मन्दिरे उच्चैर्ढक्का ।
सरितः सलिले सेलति नौका ॥2॥

पुष्पे पुष्पे नानारङ्गाः ।
तेषु डयन्ते चित्रपतङ्गाः ॥3॥

वृक्षे वृक्षे नूतनपत्रम् ।
विविधैर्वर्णैर्विभाति चित्रम् ॥4॥

धेनुः प्रातर्यच्छति दुग्धम् ।
शुद्धं स्वच्छं मधुरं स्निग्धम् ॥5॥

गहने विपिने व्याघ्रो गर्जति ।
उच्चैस्तत्र च सिंहः नर्दति ॥6॥

हरिणोऽयं खादति नवघासम् ।
सर्वत्र च पश्यति सविलासम् ॥7॥

उष्ट्रः तुङ्गः मन्दं गच्छति ।
पृष्ठे प्रचुरं भारं निवहति ॥8॥

घोटकराजः क्षिप्रं धावति ।
धावनसमये किमपि न खादति ॥9॥

पश्यत भल्लुकमिमं करालम् ।
नृत्यति थथथै कुरु करतालम् ॥10॥

–सम्पदानन्दमिश्रः

www.GOALias.blogspot.com



## शब्दार्थाः

| | | |
|---|---|---|
| **उदिते** | – | उगने पर, निकलने पर |
| **नदति** | – | आवाज/ध्वनि करता है |
| **उच्चैः** | – | ऊँची आवाज में, जोर से |
| **ढक्का** | – | नगाड़ा |
| **सेलति** | – | डगमगाती है, हिलती डुलती है |
| **डयन्ते** | – | उड़ते हैं |
| **चित्रपतङ्गाः** | – | तितलियाँ |
| **वर्णैः** | – | रंगो से |
| **विभाति** | – | सुशोभित होता है |
| **स्निग्धम्** | – | मुलायम, चिकना |
| **गहने** | – | घने |
| **विपिने** | – | जंगल में |
| **नर्दति** | – | दहाड़ता है |
| **तुङ्गः** | – | ऊँचा |
| **निवहति** | – | ढोता है |
| **क्षिप्रम्** | – | जल्दी से, तेजी से |
| **भल्लुकः** (भल्लूकः) | – | भालू |
| **करालम्** | – | भयानक |
| **करतालम्** | – | ताली |

www.GOALias.blogspot.com



## अभ्यासः

1. **गीतम् सस्वरं गायत।**

2. **एकपदेन उत्तरत-**
   (क) का विहसति?
   (ख) किम् विकसति?
   (ग) व्याघ्रः कुत्र गर्जति?
   (घ) हरिणः किं खादति?
   (ङ) मन्दं कः गच्छति?

3. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**
   (क) सलिले नौका सेलति।
   (ख) पुष्पेषु चित्रपतङ्गाः डयन्ते।
   (ग) उष्ट्रः पृष्ठे भारं वहति।
   (घ) धावनसमये अश्वः किमपि न खादति।
   (ङ) उदिते सूर्ये धरणी विहसति।

4. **मञ्जूषातः समानार्थकपदानि चित्वा लिखत-**

| पृथिवी | देवालये | जले | वने | मृगः | भयङ्करम् |
|---|---|---|---|---|---|

| | | | |
|---|---|---|---|
| धरणी | ...................... | विपिने | ...................... |
| करालम् | ...................... | हरिणः | ...................... |
| सलिले | ...................... | मन्दिरे | ...................... |

www.GOALias.blogspot.com



5. **विलोमपदानि मेलयत-**

| | |
|---|---|
| मन्दम् | नूतनम् |
| नीचैः | स्निग्धम् |
| कठोरः | प्रचुरम् |
| पुरातनम् | उच्चैः |
| अपर्याप्तम् | क्षिप्रम् |

6. **उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखत-**

(क) धावनसमये अश्वः खादति। ☐

(ख) उष्ट्रः पृष्ठे भारं न वहति। ☐

(ग) सिंहः नीचैः क्रोशति। ☐

(घ) पुष्पेषु चित्रपतङ्गाः डयन्ते। ☐

(ङ) वने व्याघ्रः गर्जति। ☐

(च) हरिणः नवघासम् न खादति। ☐

7. **अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयत-**

| | | | | |
|---|---|---|---|---|
| यथा- | चित्रपतङ्गः | (प्रथमा-बहुवचने) | - | चित्रपतङ्गाः |
| | भल्लुकः | (तृतीया-एकवचने) | - | ................... |
| | उष्ट्रः | (पञ्चमी-द्विवचने) | - | ................... |
| | हरिणः | (सप्तमी-बहुवचने) | - | ................... |
| | व्याघ्रः | (द्वितीया-एकवचने) | - | ................... |
| | घोटकराजः | (सम्बोधन-एकवचने) | - | ................... |

www.GOALias.blogspot.com



8. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत-



| | | | | |
|---|---|---|---|---|
| खगाः | विकसन्ति | कमलानि | उदेति | क्रीडन्ति |
| डयन्ते | सूर्यः | चित्रपतङ्गाः | कूजन्ति | बालाः |

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

www.GOALias.blogspot.com

परिशिष्टम्

# वर्णविचारः

## 1. वर्णाः

संस्कृते इदानीं 48 वर्णानां प्रयोगः भवति। ते मुख्यतया भागत्रयेण विभक्ताः सन्ति, 1-स्वराः 2-व्यञ्जनानि 3-अयोगवाहाश्चेति, यथा-

**स्वराः-13**
- ह्रस्वस्वराः-5
- दीर्घस्वराः-8

**व्यञ्जनानि-33**
- वर्गीयव्यञ्जनानि-25
  - क्, ख्, ग्, घ्, ङ्,
  - च्, छ्, ज्, झ्, ञ्,
  - ट्, ठ्, ड्, ढ्, ण्,
  - त्, थ्, द्, ध्, न्,
  - प्, फ्, ब्, भ्, म्,
- अवर्गीयव्यञ्जनानि-8
  - अन्तस्थाः-4
  - ऊष्माणः-4

**अयोगवाहौ-2**
- अनुस्वारः
- विसर्गः

www.GOALias.blogspot.com



## 2. उच्चारणस्थानानि

वर्णाभिव्यक्तिप्रदेशः स्थानं कथ्यते। शब्दप्रयोगसमये कायाग्निना प्रेरितः वायुः कण्ठादिस्थानेषु सञ्चरन् वर्णान् अभिव्यनक्ति। यथोक्तं पाणिनीयशिक्षायाम्–

**आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ॥**
**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥**

एवम् वर्णानाम् उच्चारणस्थानानि अष्टौ सन्ति। (*i*) उरः (*ii*) कण्ठः (*iii*) शिरः (*iv*) जिह्वामूलम् (*v*) दन्ताः (*vi*) नासिका (*vii*) ओष्ठौ (*viii*) तालुः। तद्यथा–

| वर्णाः | उत्पत्तिस्थानानि | वर्णानां संज्ञा |
|---|---|---|
| अ, आ, क्, ख्, ग्, घ्, ङ्, ह्, विसर्गः | कण्ठः | कण्ठ्यः |
| इ, ई, च्, छ्, ज्, झ्, ञ्, य्, श् | तालुः | तालव्यः |
| ऋ, ॠ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् | मूर्धा | मूर्धन्यः |
| लृ, त्, थ्, द्, ध्, न्, ल्, स् | दन्ताः | दन्त्यः |
| उ, ऊ, प्, फ्, ब्, भ्, म् | ओष्ठौ | ओष्ठ्यः |
| ङ्, ञ्, ण्, न्, म् | नासिका + कण्ठादीनि | नासिक्यः |
| ए, ऐ | कण्ठतालू | कण्ठतालव्यः |
| ओ, औ | कण्ठोष्ठम् | कण्ठोष्ठ्यः |
| व | दन्तोष्ठम् | दन्त्योष्ठ्यः |
| अनुस्वारः | नासिका | नासिक्यः |

www.GOALias.blogspot.com



# कारकम्

## ( सामान्यपरिचयः )

सामान्यतः षट्कारकाणि भवन्ति। यथा–

**कर्त्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणम् इत्याहुः कारकाणि षट्॥**

| | | |
|---|---|---|
| (*i*) कर्त्तृकारकम् | (*ii*) कर्मकारकम् | (*iii*) करणकारकम् |
| (*iv*) सम्प्रदानकारकम् | (*v*) अपादानकारकम् | (*vi*) अधिकरणकारकम् |

**कर्त्तृकारकम्** – स्वतन्त्रः कर्त्ता। क्रियायां यः स्वतन्त्रः प्रधानो वा भवति सः कर्त्ता। यथा–रामः ग्रामं गच्छति। अत्र गमनक्रियायां रामः स्वतन्त्रः वर्तते, अतः सः कर्त्तृकारकम् अस्ति। वाक्ये मुख्ये कर्तरि प्रथमा, गौणे कर्तरि च तृतीया विभक्तिः भवति। यथा–

(क) रामः ग्रामं गच्छति।
(ख) रामेण ग्रामः गम्यते।

**कर्मकारकम्** – कर्त्तुरीप्सिततमं कर्म। कर्त्ता स्वक्रियया यम् अर्थम् अतिशयेन प्राप्तुम् इच्छति तत् कर्म भवति। यथा–बालकः विद्यालयं गच्छति। अत्र वाक्ये बालकः कर्त्ता भवति, गमनक्रियया विद्यालयः तस्य ईप्सिततमं वर्तते, अतः विद्यालय इति कर्मकारकं वर्तते, कर्मणि द्वितीया विभक्तिः, (कर्मवाच्ये) मुख्ये च प्रथमा विभक्तिः भवति, यथा–

(क) बालकः विद्यालयं गच्छति।
(ख) बालकेन विद्यालयः गम्यते।

**करणकारकम्** – साधकतमं करणम्। क्रियासिद्धौ यत् अतिशयेन सहायकं भवति, तत् करणं भवति, यथा–श्यामः <u>कलमेन</u> लिखति। अत्र कर्त्तुः श्यामस्य लेखन क्रियायां कलमः अतिशयेन सहायकः अतः कलम इति करणकारकं भवति। करणे तृतीया-विभक्तिः भवति।

**सम्प्रदानकारकम्** – कर्मणा यमभिप्रैति स सम्प्रदानम्। कर्त्ता दानक्रियया यम् सम्बद्धुम् इच्छति, तत् सम्प्रदानं भवति। यथा–देवदत्तः भिक्षुकाय भिक्षां ददाति। अत्र कर्त्ता देवदत्तः

www.GOALias.blogspot.com



दानक्रियया भिक्षुकम् अभिप्रैति = सम्बन्द्धुम् इच्छति। अतः भिक्षुकपदं सम्प्रदानकारकम्। सम्प्रदाने चतुर्थी-विभक्तिः भवति।

**अपादानकारकम्** - ध्रुवमपायेऽपादानम्। अपाये = विभागे, यत् ध्रुवम् = अवधिभूतम् तत् अपादानं भवति, यथा- वृक्षात् फलं पतति। अत्र फलस्य विभागः वृक्षात् भवति, अतः वृक्षः ध्रुवः इति अपादानकारकम्। अपादाने पञ्चमी-विभक्तिः भवति।

**अधिकरणकारकम्** - आधारोऽधिकरणम्। कर्तृकर्मनिष्ठक्रियायाः आधारभूतं यत् वर्तते, तत् अधिकरणं भवति, यथा- विद्यालये छात्राः पठन्ति। अत्र कर्त्तुः पठनक्रियायाः आधारः विद्यालय अधिकरणकारकम्। अधिकरणे सप्तमी-विभक्तिः भवति।

## उपपदविभक्तिः

पदम् आश्रित्य या विभक्तिः सा उपपदविभक्तिः। यथा-

| | | |
|---|---|---|
| **उभयतः** | = | दोनों तरफ (द्वितीया) **नदीम्** उभयतः वृक्षाः सन्ति। |
| **परितः** | = | चारों तरफ (द्वितीया) **विद्यालयं** परितः प्राचीरम् अस्ति। |
| **सर्वतः** | = | सभी तरफ (द्वितीया) **ग्रामं** सर्वतः कृषिक्षेत्राणि सन्ति। |
| **प्रति** | = | की ओर (द्वितीया) छात्रः **विद्यालयं** प्रति गच्छति। |
| **निकषा** | = | समीप में (द्वितीया) **विद्यालयं** निकषा उद्यानम् अस्ति। |
| **धिक्** | = | निन्दा (द्वितीया) **मूर्खं** धिक्। |
| **सह** | = | सहित (तृतीया) बालिका **बालकेन** सह खेलति। |
| **विना** | = | अतिरिक्त (तृतीया/पञ्चमी/द्वितीया) **ज्ञानेन** विना जीवनं वृथा। |
| **अलम्** | = | वारण (तृतीया) **विवादेन** अलम्। |
| | | समर्थ (चतुर्थी) मल्लः **मल्लाय** अलम्। |
| **नमः** | = | नमस्कार (चतुर्थी) **पितृदेवाय** नमः। |
| **बहिः** | = | बाहर (पञ्चमी) **विद्यालयात्** बहिः बालकाः खेलन्ति। |
| **उपरि:** | = | ऊपर (षष्ठी) **वृक्षस्य** उपरि मर्कटाः क्रीडन्ति। |
| **अधः** | = | नीचे (षष्ठी) **वृक्षस्य** अधः पथिकः उपविशति। |
| **अन्तः** | = | भीतर (षष्ठी) **विद्यालयस्य** अन्तः छात्राः पठन्ति। |

www.GOALias.blogspot.com



# शब्दरूपाणि

## सर्वनाम-शब्दः

### एतत् (पुँल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | एषः | एतौ | एते |
| **द्वितीया** | एतम् | एतौ | एतान् |
| **तृतीया** | एतेन | एताभ्याम् | एतैः |
| **चतुर्थी** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **पञ्चमी** | एतस्मात् | एताभ्याम् | एतेभ्यः |
| **षष्ठी** | एतस्य | एतयोः | एतेषाम् |
| **सप्तमी** | एतस्मिन् | एतयोः | एतेषु |

### एतत् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | एषा | एते | एताः |
| **द्वितीया** | एताम् | एते | एताः |
| **तृतीया** | एतया | एताभ्याम् | एताभिः |
| **चतुर्थी** | एतस्यै | एताभ्याम् | एताभ्यः |
| **पञ्चमी** | एतस्याः | एताभ्याम् | एताभ्यः |
| **षष्ठी** | एतस्याः | एतयोः | एतासाम् |
| **सप्तमी** | एतस्याम् | एतयोः | एतासु |

### एतत् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | एतत् | एते | एतानि |
| **द्वितीया** | एतत् | एते | एतानि |

www.GOALias.blogspot.com



| | | | |
|---|---|---|---|
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

*विशेषः– सर्वनामशब्दानां सम्बोधने रूपाणि न भवन्ति।*

## तत् (पुँल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## तत् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

www.GOALias.blogspot.com



## तत् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## किम् (पुँल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## किम् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |

www.GOALias.blogspot.com



| | | | |
|---|---|---|---|
| **पञ्चमी** | कस्याः | काभ्याम् | काभ्यः |
| **षष्ठी** | कस्याः | कयोः | कासाम् |
| **सप्तमी** | कस्याम् | कयोः | कासु |

## किम् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | किम् | के | कानि |
| **द्वितीया** | किम् | के | कानि |
| **तृतीया** | केन | काभ्याम् | कैः |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्यः |
| **पञ्चमी** | कस्मात् | काभ्याम् | केभ्यः |
| **षष्ठी** | कस्य | कयोः | केषाम् |
| **सप्तमी** | कस्मिन् | कयोः | केषु |

## इकारान्त-स्त्रीलिङ्ग-शब्दः

### मति

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | मतिः | मती | मतयः |
| **द्वितीया** | मतिम् | मती | मतीः |
| **तृतीया** | मत्या | मतिभ्याम् | मतिभिः |
| **चतुर्थी** | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| **पञ्चमी** | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| **षष्ठी** | मत्याः/मतेः | मत्योः | मतीनाम् |
| **सप्तमी** | मत्याम्/मतौ | मत्योः | मतिषु |
| **सम्बोधनम्** | हे मते! | हे मती! | हे मतयः! |

*एवमेव गति-स्थिति-शक्ति-प्रीति-कृति-इत्यादीनाम् इकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि भवन्ति।*

www.GOALias.blogspot.com



## ईकारान्त-स्त्रीलिङ्ग-शब्दः

### नदी

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | नदी | नद्यौ | नद्यः |
| **द्वितीया** | नदीम् | नद्यौ | नदीः |
| **तृतीया** | नद्या | नदीभ्याम् | नदीभिः |
| **चतुर्थी** | नद्यै | नदीभ्याम् | नदीभ्यः |
| **पञ्चमी** | नद्याः | नदीभ्याम् | नदीभ्यः |
| **षष्ठी** | नद्याः | नद्योः | नदीनाम् |
| **सप्तमी** | नद्याम् | नद्योः | नदीषु |
| **सम्बोधनम्** | हे नदि! | हे नद्यौ! | हे नद्यः! |

*एवमेव भगिनी-लेखनी-मानिनी-पठन्ती-इत्यादीनाम् ईकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि भवन्ति।*

## इकारान्त-नपुंसकलिङ्ग-शब्दः

### वारि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | वारि | वारिणी | वारीणि |
| **द्वितीया** | वारि | वारिणी | वारीणि |
| **तृतीया** | वारिणा | वारिभ्याम् | वारिभिः |
| **चतुर्थी** | वारिणे | वारिभ्याम् | वारिभ्यः |
| **पञ्चमी** | वारिणः | वारिभ्याम् | वारिभ्यः |
| **षष्ठी** | वारिणः | वारिणोः | वारीणाम् |
| **सप्तमी** | वारिणि | वारिणोः | वारिषु |
| **सम्बोधनम्** | हे वारि! हे वारे! | हे वारिणी! | हे वारीणि! |

www.GOALias.blogspot.com



## ऋकारान्त-पुँलिङ्ग-शब्दः

### पितृ

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | पिता | पितरौ | पितरः |
| **द्वितीया** | पितरम् | पितरौ | पितॄन् |
| **तृतीया** | पित्रा | पितृभ्याम् | पितृभिः |
| **चतुर्थी** | पित्रे | पितृभ्याम् | पितृभ्यः |
| **पञ्चमी** | पितुः | पितृभ्याम् | पितृभ्यः |
| **षष्ठी** | पितुः | पित्रोः | पितॄणाम् |
| **सप्तमी** | पितरि | पित्रोः | पितृषु |
| **सम्बोधनम्** | हे पितः! | हे पितरौ! | हे पितरः! |

*एवमेव भ्रातृ-जामातृ-देवृ (देवर)-इत्यादीनाम् ऋकारान्त-पुँलिङ्ग-शब्दानां रूपाणि भवन्ति। तृन्-तृच्-प्रत्ययान्तानां दातृ-वक्तृ-धातृ-नेतृ-इत्यादीनां तथा स्वसृ-नप्तृ-क्षत्र्-होतृ-पोतृ-शब्दानां प्रथमा-द्वितीया-विभक्त्योः रूपेषु दीर्घः भवति। यथा-दाता, दातारौ दातारः। मातृशब्दस्य द्वितीया बहुवचने मातॄः भवति, अन्यानि रूपाणि समानानि एव।*

## उकारान्त-नपुंसकलिङ्ग-शब्दः

### मधु

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | मधु | मधुनी | मधूनि |
| **द्वितीया** | मधु | मधुनी | मधूनि |
| **तृतीया** | मधुना | मधुभ्याम् | मधुभिः |
| **चतुर्थी** | मधुने | मधुभ्याम् | मधुभ्यः |
| **पञ्चमी** | मधुनः | मधुभ्याम् | मधुभ्यः |
| **षष्ठी** | मधुनः | मधुनोः | मधूनाम् |
| **सप्तमी** | मधुनि | मधुनोः | मधुषु |
| **सम्बोधनम्** | हे मधु, हे मधो! | हे मधुनी! | हे मधूनि! |

*एवमेव जानु-तालु-वस्तु-इत्यादीनाम् उकारान्त-नपुंसकशब्दानां रूपाणि भवन्ति।*

www.GOALias.blogspot.com



# धातु-रूपाणि

## चर् (चलना, चरना)

### लट्लकारः (वर्तमानकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चरति | चरतः | चरन्ति |
| **मध्यमपुरुषः** | चरसि | चरथः | चरथ |
| **उत्तमपुरुषः** | चरामि | चरावः | चरामः |

### लृट्लकारः (भविष्यत्कालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चरिष्यति | चरिष्यतः | चरिष्यन्ति |
| **मध्यमपुरुषः** | चरिष्यसि | चरिष्यथः | चरिष्यथ |
| **उत्तमपुरुषः** | चरिष्यामि | चरिष्यावः | चरिष्यामः |

### लङ्लकारः (अतीतकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अचरत् | अचरताम् | अचरन् |
| **मध्यमपुरुषः** | अचरः | अचरतम् | अचरत |
| **उत्तमपुरुषः** | अचरम् | अचराव | अचराम |

### लोट्लकारः (अनुज्ञा/आदेशः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | चरतु | चरताम् | चरन्तु |
| **मध्यमपुरुषः** | चर | चरतम् | चरत |
| **उत्तमपुरुषः** | चराणि | चराव | चराम |

www.GOALias.blogspot.com



### विधिलिङ्लकारः ( विधिः/सम्भावना )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चरेत् | चरेताम् | चरेयुः |
| मध्यमपुरुषः | चरेः | चरेतम् | चरेत |
| उत्तमपुरुषः | चरेयम् | चरेव | चरेम |

*एवमेव हस्, चल्, खेल्, खाद्, धाव्, रक्ष्, पूज्, कूर्द्, पत्, भ्रम्, लिख्, गम् (गच्छ), पठ्, क्रीड्-इत्यादीनां धातूनां रूपाणि भवन्ति।*

## कृ ( करना )

### लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

### लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

### लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकरवाव | अकरवाम |

www.GOALias.blogspot.com



## लोट्लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | करोतु | कुरुताम् | कुर्वन्तु |
| **मध्यमपुरुषः** | कुरु | कुरुतम् | कुरुत |
| **उत्तमपुरुषः** | करवाणि | करवाव | करवाम |

## विधिलिङ्लकारः ( विधिः/सम्भावना )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | कुर्यात् | कुर्याताम् | कुर्युः |
| **मध्यमपुरुषः** | कुर्याः | कुर्यातम् | कुर्यात |
| **उत्तमपुरुषः** | कुर्याम् | कुर्याव | कुर्याम |

## वस् ( रहना )

## लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | वसति | वसतः | वसन्ति |
| **मध्यमपुरुषः** | वससि | वसथः | वसथ |
| **उत्तमपुरुषः** | वसामि | वसावः | वसामः |

## लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | वत्स्यति | वत्स्यतः | वत्स्यन्ति |
| **मध्यमपुरुषः** | वत्स्यसि | वत्स्यथः | वत्स्यथ |
| **उत्तमपुरुषः** | वत्स्यामि | वत्स्यावः | वत्स्यामः |

www.GOALias.blogspot.com



## लङ्लकारः (अतीतकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवसत् | अवसताम् | अवसन् |
| मध्यमपुरुषः | अवसः | अवसतम् | अवसत |
| उत्तमपुरुषः | अवसम् | अवसाव | अवसाम |

## लोट्लकारः (अनुज्ञा/आदेशः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वसतु | वसताम् | वसन्तु |
| मध्यमपुरुषः | वस | वसतम् | वसत |
| उत्तमपुरुषः | वसानि | वसाव | वसाम |

## विधिलिङ्लकारः (विधिः/सम्भावना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वसेत् | वसेताम् | वसेयुः |
| मध्यमपुरुषः | वसेः | वसेतम् | वसेत |
| उत्तमपुरुषः | वसेयम् | वसेव | वसेम |

# दृश् (पश्य) देखना

## लट्लकारः (वर्तमानकालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमपुरुषः | पश्यामि | पश्यावः | पश्यामः |

## लृट्लकारः (भविष्यत्कालः)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

www.GOALias.blogspot.com



## लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपुरुषः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमपुरुषः | अपश्यम् | अपश्याव | अपश्याम |

## लोट्लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यतु | पश्यताम् | पश्यन्तु |
| मध्यमपुरुषः | पश्य | पश्यतम् | पश्यत |
| उत्तमपुरुषः | पश्यानि | पश्याव | पश्याम |

## विधिलिङ्लकारः ( विधिः/सम्भावना )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्येत् | पश्येताम् | पश्येयुः |
| मध्यमपुरुषः | पश्येः | पश्येतम् | पश्येत |
| उत्तमपुरुषः | पश्येयम् | पश्येव | पश्येम |

## स्था ( तिष्ठ ) ठहरना

## लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| मध्यमपुरुषः | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उत्तमपुरुषः | तिष्ठामि | तिष्ठावः | तिष्ठामः |

www.GOALias.blogspot.com



## लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्थास्यति | स्थास्यतः | स्थास्यन्ति |
| मध्यमपुरुषः | स्थास्यसि | स्थास्यथः | स्थास्यथ |
| उत्तमपुरुषः | स्थास्यामि | स्थास्यावः | स्थास्यामः |

## लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| मध्यमपुरुषः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| उत्तमपुरुषः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

## लोट्लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठतु | तिष्ठताम् | तिष्ठन्तु |
| मध्यमपुरुषः | तिष्ठ | तिष्ठतम् | तिष्ठत |
| उत्तमपुरुषः | तिष्ठानि | तिष्ठाव | तिष्ठाम |

## विधिलिङ्लकारः ( विधिः/सम्भावना )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठेत् | तिष्ठेताम् | तिष्ठेयुः |
| मध्यमपुरुषः | तिष्ठेः | तिष्ठेतम् | तिष्ठेत |
| उत्तमपुरुषः | तिष्ठेयम् | तिष्ठेव | तिष्ठेम |

www.GOALias.blogspot.com



## पच् ( पकाना )

### लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पचति | पचतः | पचन्ति |
| **मध्यमपुरुषः** | पचसि | पचथः | पचथ |
| **उत्तमपुरुषः** | पचामि | पचावः | पचामः |

### लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पक्ष्यति | पक्ष्यतः | पक्ष्यन्ति |
| **मध्यमपुरुषः** | पक्ष्यसि | पक्ष्यथः | पक्ष्यथ |
| **उत्तमपुरुषः** | पक्ष्यामि | पक्ष्यावः | पक्ष्यामः |

### लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अपचत् | अपचताम् | अपचन् |
| **मध्यमपुरुषः** | अपचः | अपचतम् | अपचत |
| **उत्तमपुरुषः** | अपचम् | अपचाव | अपचाम |

### लोट्लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पचतु | पचताम् | पचन्तु |
| **मध्यमपुरुषः** | पच | पचतम् | पचत |
| **उत्तमपुरुषः** | पचानि | पचाव | पचाम |

www.GOALias.blogspot.com



## विधिलिङ्लकारः ( विधिः/सम्भावना )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पचेत् | पचेताम् | पचेयुः |
| मध्यमपुरुषः | पचेः | पचेतम् | पचेत |
| उत्तमपुरुषः | पचेयम् | पचेव | पचेम |

## पा ( पिब् ) पीना

### लट्लकारः ( वर्तमानकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यमपुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तमपुरुषः | पिबामि | पिबावः | पिबामः |

### लृट्लकारः ( भविष्यत्कालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

### लङ्लकारः ( अतीतकालः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

www.GOALias.blogspot.com



## लोट्लकारः ( अनुज्ञा/आदेशः )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबतु | पिबताम् | पिबन्तु |
| मध्यमपुरुषः | पिब | पिबतम् | पिबत |
| उत्तमपुरुषः | पिबानि | पिबाव | पिबाम |

## विधिलिङ्लकारः ( विधिः/सम्भावना )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यमपुरुषः | पिबेः | पिबेतम् | पिबेत |
| उत्तमपुरुषः | पिबेयम् | पिबेव | पिबेम |

# संख्यावाचकशब्दाः

| | | | |
|---|---|---|---|
| १ | एकः | ११ | एकादशः |
| २ | द्वौ | १२ | द्वादशः |
| ३ | त्रयः | १३ | त्रयोदशः |
| ४ | चत्वारः | १४ | चतुर्दशः |
| ५ | पञ्च | १५ | पञ्चदशः |
| ६ | षट् | १६ | षोडशः |
| ७ | सप्त | १७ | सप्तदशः |
| ८ | अष्ट/अष्टौ | १८ | अष्टादशः |
| ९ | नव | १९ | नवदशः/एकोनविंशतिः/ऊनविंशतिः |
| १० | दश | २० | विंशतिः |

www.GOALias.blogspot.com



| | | | |
|---|---|---|---|
| २१ | एकविंशतिः | ४१ | एकचत्वारिंशत् |
| २२ | द्वाविंशतिः | ४२ | द्विचत्वारिंशत् |
| २३ | त्रयोविंशतिः | ४३ | त्रयश्चत्वारिंशत्/त्रिचत्वारिंशत् |
| २४ | चतुर्विंशतिः | ४४ | चतुश्चत्वारिंशत् |
| २५ | पञ्चविंशतिः | ४५ | पञ्चचत्वारिंशत् |
| २६ | षड्विंशतिः | ४६ | षट्चत्वारिंशत् |
| २७ | सप्तविंशतिः | ४७ | सप्तचत्वारिंशत् |
| २८ | अष्टाविंशतिः | ४८ | अष्टचत्वारिंशत्/अष्टाचत्वारिंशत् |
| २९ | नवविंशतिः/एकोनत्रिंशत् | ४९ | नवचत्वारिंशत्/एकोनपञ्चाशत् |
| ३० | त्रिंशत् | ५० | पञ्चाशत् |
| ३१ | एकत्रिंशत् | ५१ | एकपञ्चाशत् |
| ३२ | द्वात्रिंशत् | ५२ | द्वापञ्चाशत्/द्विपञ्चाशत् |
| ३३ | त्रयस्त्रिंशत् | ५३ | त्रयःपञ्चशत्/त्रिपञ्चाशत् |
| ३४ | चतुस्त्रिंशत् | ५४ | चतुःपञ्चाशत् |
| ३५ | पञ्चत्रिंशत् | ५५ | पञ्चपञ्चाशत् |
| ३६ | षट्त्रिंशत् | ५६ | षट्पञ्चाशत् |
| ३७ | सप्तत्रिंशत् | ५७ | सप्तपञ्चाशत् |
| ३८ | अष्टात्रिंशत् | ५८ | अष्टापञ्चाशत्/अष्टपञ्चाशत् |
| ३९ | नवत्रिंशत्/एकोनचत्वारिंशत् | ५९ | नवपञ्चाशत्/एकोनषष्टिः |
| ४० | चत्वारिंशत् | ६० | षष्टिः |

www.GOALias.blogspot.com



| | | | |
|---|---|---|---|
| ६१ | एकषष्टिः | ८१ | एकाशीतिः |
| ६२ | द्वाषष्टिः/द्विषष्टिः | ८२ | द्व्यशीतिः |
| ६३ | त्रयष्षष्टिः/त्रिषष्टिः | ८३ | त्र्यशीतिः |
| ६४ | चतुष्षष्टिः | ८४ | चतुरशीतिः |
| ६५ | पञ्चषष्टिः | ८५ | पञ्चाशीतिः |
| ६६ | षट्षष्टिः | ८६ | षडशीतिः |
| ६७ | सप्तषष्टिः | ८७ | सप्ताशीतिः |
| ६८ | अष्टाषष्टिः/अष्टषष्टिः | ८८ | अष्टाशीतिः |
| ६९ | नवषष्टिः/एकोनसप्ततिः | ८९ | नवाशीतिः/एकोननवतिः |
| ७० | सप्ततिः | ९० | नवतिः |
| ७१ | एकसप्ततिः | ९१ | एकनवतिः |
| ७२ | द्वासप्ततिः/द्विसप्ततिः | ९२ | द्वानवतिः/द्विनवतिः |
| ७३ | त्रिसप्ततिः/त्रयस्सप्ततिः | ९३ | त्रयोनवतिः/त्रिनवतिः |
| ७४ | चतुस्सप्ततिः | ९४ | चतुर्नवतिः |
| ७५ | पञ्चसप्ततिः | ९५ | पञ्चनवतिः |
| ७६ | षट्सप्ततिः | ९६ | षण्णवतिः |
| ७७ | सप्तसप्ततिः | ९७ | सप्तनवतिः |
| ७८ | अष्टासप्ततिः/अष्टसप्ततिः | ९८ | अष्टानवतिः/अष्टनवतिः |
| ७९ | नवसप्ततिः/एकोनाशीतिः | ९९ | नवनवतिः/एकोनशतम् |
| ८० | अशीतिः | १०० | शतम् |

www.GOALias.blogspot.com



# पूरणवाचकशब्दाः

| | पुँलिङ्गे | स्त्रीलिङ्गे | नपुँसकलिङ्गे |
|---|---|---|---|
| १ | प्रथमः | प्रथमा | प्रथमम् |
| २ | द्वितीयः | द्वितीया | द्वितीयम् |
| ३ | तृतीयः | तृतीया | तृतीयम् |
| ४ | चतुर्थः | चतुर्थी | चतुर्थम् |
| ५ | पञ्चमः | पञ्चमी | पञ्चमम् |
| ६ | षष्ठः | षष्ठी | षष्ठम् |
| ७ | सप्तमः | सप्तमी | सप्तमम् |
| ८ | अष्टमः | अष्टमी | अष्टमम् |
| ९ | नवमः | नवमी | नवमम् |
| १० | दशमः | दशमी | दशमम् |